॥श्रीः॥

# ॥ मुद्रणव्यवस्थाः ॥

पुस्थकेऽस्मिन् गात्रभेदेन रेखाभेदेन च पञ्चविधा अक्षरमुद्राः उपयुक्ताः —

| | | | |
|---|---|---|---|
| १ | बृहल्लिपिः स्थूलरेखा । | ३ | अणुलिपिः स्थूलरेखा । |
| २ | सैव कृशरेखा । | ४ | सैव मध्यमरेखा। |
| | | ५ | सैव कृशरेखा । |

इति । अथैतासां विनियोगः -

१ बृहल्लिपिः स्थूलरेखा।

१ सामन्यसूत्राणि प्रथमोपादाने।

२ यदृच्छाशब्दाः - यथा काशिकारूपावतार इत्यादयः पञ्चमपृष्ठे।

२ बृहल्लिपिः कृशरेखा।

१ सूत्रवव्याख्यानरूपं ग्रन्थशरीरम्।

२ सूत्रेष्वनुवृत्या योज्यानि पदान्यन्ते वलयाभ्यां विश्लेषितानि।

यथा - **उच्चैरुदात्तः** (अच्) इति सप्तमपृष्ठे।

३ अणुलिपिः स्थूलरेखा।

१ वार्तिकानि नक्षत्रचिह्नाङ्कितानि।

२ विशेषविधिपराण्नत्यन्तोपयुक्तानि सूत्राणि।

३ अणुलिपिः कृशरेखा।

१ उदाहरणानि।

२ अनत्यन्तोपयुक्तानां विशेषविधिपराणां अणुलिपिभिर्मुद्रितानां सूत्राणां व्याख्यानम्।

३ पृष्ठानामधोभागे तिप्पणानि।

सूत्रानुक्रमानुरोधादुपत्तानि प्रकरणान्तरं एवोपयुक्तानि सूत्राणि व्याख्योदागरणसहितानि आनुषङ्गिकत्वद्योतनाय कोष्ठविगह्वेन [ ] एवंरूपेण पृथक्कृतानि। यथा २२ तम पृष्ठे अन्तादिवच्च, षत्वतुकोरसिद्धः इति सूत्रद्वयम्।

उक्तानां व्यवस्थानां क्वचित् क्वचित् भङ्गोऽपि जात इति सलज्जमभ्युपगन्तव्यं वर्तते। एवं शुद्धिपत्रमपि न सम्पूर्णम्, यथा - ३४ तमपृष्ठे 'पुम खय्यम्परे' इति सूत्रस्य प्रत्युदाहरणे 'पु + क्षमा = पुक्षमा' इति मुद्रणीये 'पु+प्रेतिभा = पुप्रतिभा' इति मुद्रितं न शोधितमिति पश्चात् ज्ञातम्। सर्वाणीदृशानि स्खलितानि द्वितीयायामङ्कनावृत्तौ शोधतयिष्यन्त इति मर्षणीयानीयर्थ्यन्ते दक्षिणा वाचयितारः।

अत्यूर्जितं वस्तु चलं च चित्तमतः प्रमादः सुलभः प्रणेतुः।
प्रमादिनौ लेखकमुद्रकौ च, क्वात्यन्तिकी पुस्तकं! ते विशुद्धिः॥

A. A. Rajaraja Varma

॥श्रीः॥

# ॥ लघुपानणिनीयम्॥

## भूमिका।

**व्याकरणदुर्गमार्गेष्वप्रौढान् बालकान् प्रचारयितुम्।**
**लघुपाणिनीयमेतत् प्रणीयते रजराजेन ॥**

अत्र किल भगवानाचार्यः **पाणिनि**र्महेश्वरप्रसादादधिगत्य शब्दविद्यारहस्यस्य वैदिकलौकिकभेदेन द्विविधायाः संस्कृतभाषायाः व्याकरणं प्रणिनाय। तस्य च सूत्राणां किञ्चिदूनैश्चतुर्भिः सहस्रैरुपकल्पितोऽष्टभिरध्यायैः परिच्छिन्नत्वा**दष्टाध्यायी**ति शब्दितः **सूत्रपाठः** शरीरम्। **गणपाठः, धातुपाठः, अक्षरसमाम्नायः, शिक्षा, लिङ्गानुशासनम्** इति पञ्चाङ्गानि।

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभ्यमनवद्यं च सूत्रं सूत्रविदो विदुः॥'

इत्युक्तलक्षणैः सूत्रैः प्रायशः प्रत्ययः, आदेशः, आगम इति त्रिधा भिन्नानि व्याकरणकार्याण्यनुशास्त्याचार्यः। पृथक्प्रयोगानर्हं परससर्गेणार्थप्रत्यायकमक्षरं (अक्षरसमुदायो वा) **प्रत्यय** इतुच्यते। यस्मिञ्छब्दे प्रत्ययः ससृज्यते, सा प्रकृतिः। यथा - 'घटत्वम्' इत्यत्र घटशब्दः प्रकृतिः, 'त्व' इत्यक्षरं प्रत्ययः। स्थितं वर्णमपनीय तत्स्थाने विहितमक्षरं (अक्षरसमुदायो वा) **आदेशः** ; तत्र स्थितो वर्णः **स्थानी**त्युच्यते। यथा - ' तौ+इव=ताविव ' इत्यत्र औकारः स्थानी, आव् इत्यादेशः। प्रतिनवस्य वर्णस्य योजन**मागमः**। यथा ' तरु+छाया=तरुच्छाया ' इत्यत्र रुकारछकारयोर्मध्ये चकार आगमः। आगमविपरीतः स्थितस्य नाशरूपः आदेश एव **लोप** इत्युच्यते। यथा - ' राजन्+पुरुषः = राजपुरुषः ' इत्यत्र नकारस्य लोपः॥

'स्थाने शत्रुवदादेशः फाले पुण्ड्रवदागमः।
दन्तानामिव लोपः स्याच्छत्रवत् प्रत्ययाः परे॥'

इत्यागमादेशलोपप्रयायानां भेदो दर्शितः प्राचीनैः।

अथाङ्गभूतानां धातुपाठादीनां स्वभावो वर्ण्यते — भू, एध, स्पर्ध, अद, हु इत्यादीनां क्रियावाचिनीनां प्रकृतीनां परिगणनं **धातुपाठ** इति व्याह्रियते। तत्र 'भू सत्तयां' 'एध वृद्धौ', इत्याद्यर्थनिर्देशोऽर्वाचीन एव, न त्वाचार्यप्रणीतः। भ्वादिरदादिरित्यादिदशगणात्मको धातुपाठः। सर्वादिः, प्रादिः , इत्यादिनाम-शब्दप्रकृतीनां परिगणनं **गणपाठः**। ते च बहवः सन्ति। स्वरान्तो व्यञ्जनान्तो जुणवाची बह्वक्षर इत्यादिवत् केनापि साधारणे धर्मेण ये निर्द्देष्टुं न शक्यन्ते तैरेव शब्दैः पाणिनिर्गणान् कल्पयति। गणे यः शब्दः प्रथमं पठ्यते तेन तस्य गणस्य संज्ञा क्रियते। यथा - सर्व, विश्व, उभ, उभय इत्यादिर्गणः सर्वादिरुचयते। अक्षराणां पाठो**ऽक्षरसमाम्नायः**। अक्षराणामेवोच्चारणशिक्षणं **शिक्षा**ख्यस्य भागस्य विषयः। अमुकम्य शब्दस्यामुकं लिङ्गं इत्यनुशासनं लिङ्गानुशासनम्। तत्राक्षरसमाम्नायो महेश्वरेण प्रोक्त इति ह स्माहु, अन्यानि तु पञ्च निःसंशयं पाणिनीयान्येव।

पञ्चपाठ्यामस्यां प्रतिष्ठापितमाचार्येण स्वकीयं व्याकरणम्। व्याप्नोति चैषा व्याकरणस्य समग्रं विषयम्। तथापि नैकः सर्वं जानातीति न्यायेन भगवतः पाणिनेस्तन्त्रे तत्र तत्र न्यूनतां पश्यन् **कात्यायन**ऋषिः प्राधान्येन शेषपूरणपरं **वार्तिक**संज्ञितं तद्विवरणं प्रणिनाय। पाणिनेः सूत्रेषु कात्यायनस्य वार्तिकेषु च कूलङ्कषां चर्चां कुर्वन् पतञ्जलिः शब्दानुशासनसर्वस्वभूत **महाभाष्य**मभाषिष्ट। अतश्च मुनित्रयस्य यथोत्तरं प्रामाण्यमिच्छन्ति पाणिनीयाः। न्याय्यं चैतत्। किन्तु मुनित्रयेणास्मृता अपि दृष्यन्त एव प्रयोगा महाकविग्रण्थेषु। तथा हि — विश्रम इति वक्तव्ये विश्राम इति प्रयुञ्जाते काळिदासभवभूती। ऋतेशब्दयोगे पाणिनीयानामनभिमतापि द्वितीयाविभक्तिर्बहुत्र दृश्यते। एवं कृशाङ्गी, कम्बुकण्ठी, मृदुगात्री इत्यादिपदानि पाणिनीयानुल्लङ्घ्य ईकारन्तान्येव कविभिः प्रयुज्यन्ते। अनुशिष्टाश्चैते प्रयोगाः पतञ्जलेरनन्तरगामिभिः

काशिकाकारचन्द्रस्वामिप्रभृतिभिः। तथापि भट्टोजिप्रभृतयः केचिदर्वाचीना मुनित्रये श्रद्धाजाड्येन सुशब्दानेतान् न सहन्ते। वीरवैयाकरणानां दुःशाठ्यमिदं वीरवैष्णवैः कृतं शङ्करदूषणमिव मध्यस्थैरुपेक्षणीयमिति मन्यामहे।

प्रसङ्गवशात् पाणिनीयव्याख्यातॄणामन्येऽपि केऽप्यसुन्दरा व्याख्याप्रकाराः अत्र निरूप्यन्ते। ते हि पणिनेः सर्वज्ञत्वं प्रतिज्ञाय तेन स्वप्नेऽप्यनुत्प्रेक्षितानर्थान्, तत्सूत्राणि निष्पीड्य, सम्पादयन्ति। तथा हि — ते कदाचिदिष्टसिद्ध्यर्थमेकधा स्थितं सूत्रम् द्विधा छिन्दन्ति, यः किल योगविभाग इत्युच्यन्ते। अन्यदा सूत्रगतानि पदानि समग्रमेव वा सूत्रमावर्तयन्ति। एकदा 'छन्दोवद्भवन्ति सूत्राणि' इति स्वातन्त्र्येण कञ्चिन्न्यायमुल्लिख्य पञ्चम्यर्थे चतुर्थी, चतुर्थ्यर्थे प्रथमा, अविभक्तिको निर्देश इत्यादि प्रतिज्ञानैर्विभक्तीर्व्याकुली- -कुर्वन्ति। सूत्रेषु कुत्राप्यदृष्टं वर्णमैन्द्रजालिका इव प्रश्लेषादिभिरुपायैरावि- -ष्कुर्वन्ति। किं बहुना, नास्ति स उपायो यं काशकुशावलम्बिन एते नाद्रियेरन्। कुसृष्टिकल्पनाव्यवसायोऽयं, मन्ये, महाभाष्यादेवाधीत एभिः। भाष्यकारस्तावत् कमप्यर्थमादाय द्विसहस्रजिह्व इव सर्वतोमुखं प्रश्नसहस्रं प्रयुङ्क्ते, एकैकं स्वयं चोत्तरयति। तत्सन्दर्भेषु कदाचिद्वादकोलाहले कुमार्गेणापि सञ्चरते। योऽयं प्रौढिवाद इति वयपदिष्टपन्था दुर्व्याख्यातृभिः शिष्यव्यामोहनाय स्वग्रन्थेषु निबध्यदते। मार्गोऽयं सर्वथा कुमार्गो वा न वेति विचारो दूरे तवदास्तां, बालशिक्षणार्थमुद्दिष्टेषु ग्रन्थेषु नैष मार्गः शोभते इत्यत्र कस्य वा विप्रतिपत्तिः? अतश्च ग्रन्थेस्मिन् सूत्राणि यथाश्रुतरीत्यैव वयाख्यायन्ते। तवतैव च तृप्यन्ति सुशब्दग्रहणमात्रदत्तदृष्टयो व्याकरणाध्ययायिनः।

लोकेस्मिन् पाणिनीयं तन्त्रमिव परिपूर्णं नास्त्येवान्यद्व्याकरण-प्रस्थानमिति निर्विवादमेतत्, तथापि तन्त्रमेतत् पथ्यमेरण्डतैलमिव बालेभ्यो न रोचते। तत्र गुडजिह्विकाप्रयोगार्थमस्माकमयमारम्भः। पाणिनीयं व्याकरणमिति श्रुत्वैव बाला यत् बिभ्यति तत्र को हेतुरिति विमृशाम - पाणिनिस्तावत् सङ्केतजटिलैः सूत्रैर्व्याहरति। सङ्केता पुनस्तत्र तत्र विकीर्णा परस्परसमापेक्षाश्च। तथाहि 'वृद्धिरादैच्' इति प्रथमं सूत्रं 'वृद्धिः' 'आत्' 'ऐच्' इति त्रिभिः प्रथमान्तैः पदैर्घटितम्। अनेन आ, ए, ओ, इत्येषा वर्णना वृद्धिरिति सज्ञा विधीयते। तत्र 'आत्' इत्यस्य आकारः इत्यर्थं ग्रहीतुं 'तपरस्तत्कालस्य' इति वक्ष्यमाणस्य सूत्रस्यापेक्षास्ति। ऐच् इत्ययं शब्दः ऐकारं औकारं च बोधयतीति ग्रहः 'आदिरन्त्येन सहेता' इति सूत्रस्यार्थज्ञानेनैव भवति। तस्य च सूत्रस्यार्थग्रहो 'हलन्त्यम्' इति सूत्रान्तरेण विहिता संज्ञा अपेक्षते। 'हलन्त्यं' इति सूत्रे च हल्पदं 'आदिरन्त्येने'-त्यादिना सिद्धमिति परस्पराश्रयाद्व्याकुलीभावः। किं च पूर्वापेक्षया परस्य सूत्रस्य प्रामण्यं, कानिचित् सूत्राणि सूत्रान्तरापेक्षया असिद्धानि, इत्यादीनां स्वतन्त्रसङ्केतानमनुरोधेन बालसुगमं कमपि विषयं विभागं पणिनिर्न कृतवान्। विषयश्च प्रकृत्या कर्कशः। मूलस्य तावदवस्ठेयं, व्याख्यानानां तु दशा शोच्यतरेति पूर्वमेव किल प्रतिपदितम्। एवं च पणिनीयं तन्त्रं प्रिखाभिः प्राकरैश्च प्रिक्षिप्त दुर्गमिव दुरासदं संवृत्तम्। दुर्गेऽस्मिन् प्रविवक्षूणां पुरातनैरुद्घाटितं द्वारद्वयं वर्तते - **काशिका**कृतमेकं, रूपावतरकृतमन्यदिति। तत्र च प्रथमेन (द्वारेण) प्रविशन् दिदृक्षुः पुरुषो रथ्योपरथ्याक्रमेण बभ्रम्यमाणः सर्वतो नीतोऽपि तत्रत्यानामद्भुतपदार्थानां शकलीकृत्य तत इतो विकीर्णत्वात् पृथक्कृतानेक- -देशानेव पश्यति, न तु समग्रं किमपि दृश्यं वस्तु। द्वितीयेन तु प्रविशन् शकली- -कृत्य विक्षिप्तानेकदेशानुच्चित्य यथास्त्यानं विनिवेश्य समग्रीकर्त्तुः पुरः पश्चात् पर्श्वयोश्च पदेपदे विकृष्यमाण आयास्यते। एव च द्वारभ्यामुभाभ्यामपि प्रवेशे क्लेश एव प्रविष्टस्य। अतो वयः प्रकतमिदं प्रचीनैः प्रहतं द्वारद्वयमपि विहाय पक्वेष्टकचित्तास्वपि प्राकारभित्तिषु तत्र तत्र सुलभैर्जालमार्गैर्बलानन्त प्रवेश्य तत्र च सुखसवासोचितासु विरळास्वपि कासुचिद्वलभीषु निवेश्य दूरदर्शिनीप्रभृतीनां

नवीनदृष्टानां यन्त्राणां सहय्येन दूरविकीर्णानि शकलानि सन्निधाप्यावश्यदर्शनीयं सर्वमप्यर्थजातं दर्शयिष्यामः।

तथा च ग्रन्थेऽस्मिन् प्राचीनं प्रस्थानद्वयमुपेक्ष्य नवीनमेकं प्रस्थानमु--ल्लिखितम्। काशिकावृत्यादिष्वेव सूत्राणां पाठक्रमेण व्याख्याने रॆपसिद्धिकथनं न चारु स्यात्, कौमुदीरूपावतारादिष्विव रॊपसिद्ध्यपेक्षया क्रममुपेक्ष्य व्याख्याने प्रकरणाधिकारानवृत्त्यादीनामयोगात् सूत्रार्थबोधो दुर्घटो भवति अतः सम्मिश्रः कोऽपि मार्गोऽत्र गृहीतः।

---------------

# ग्रन्थारम्भः।

व्याकरणप्रतिपाद्यो विषयोऽत्र चतुर्धा विभज्यते -

१ अक्षरनिरूपणपरः **शिक्षाकाण्डः**,

२ शब्दानां रूपसिद्धिविचारकः **परिनिष्ठाकण्डः**,

३ शब्दानं व्युत्पत्तिप्रतिपादकः **निरुक्तकाण्डः**,

४ पदानामन्वयव्यवस्थानवर्णरूप **आकाङ्क्षाकण्डश्चेति**।

---------------

## शिक्षाकाण्डः।

### संज्ञाप्रकरणम्।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १) | अ | इ | उ | ऋ | लृ | | | | |
| २) | आ | ई | ऊ | ॠ | - | ए | ऐ | ओ | औ |
| ३) | क | ख | ग | घ | ङ | | | | |
| ४) | च | छ | ज | झ | ञ | | | | |
| ५) | ट | ठ | ड | ढ | ण | | | | |
| ६) | त | थ | द | ध | न | | | | |
| ७) | प | फ | ब | भ | म | | | | |
| ८) | य | र | ल | व | | | | | |
| ९) | श | ष | स | | | | | | |
| १०) | ह | | | | | | | | |

संस्कृतभषायाः लौकिकीयमक्षरमाला। अक्षरैरेतैर्घटितमेव गैर्वाण्यां समस्तं पदजातम्। भाषा तवद्वाक्यरूपा, वाक्यानि पदैर्घटितानि, पदान्यक्षरैरारभ्यन्ते, अक्षराणि वर्णैरुपकल्पितानि। तथा च घटादिपदार्थानां परमणव इव भाषाया उपादनकारणं वर्णाः। निरवयव एकत्वव्यवहारार्हः स्फुटो नादो वर्ण इति तस्य लक्षणम्। तत्र स्वयमिच्चारणार्हो वर्णः स्वरः, तदनर्हं व्यञ्जनम्। अत्र प्रदर्शितायामक्षरमालायां प्रथमद्वितीय-

-पङ्क्त्योर्विन्यस्ताः स्वराः, शेषा व्यञ्जनानि। व्यञ्जनानां स्वमुच्चारणाक्षमत्वात् तेष्वेकैकस्मिन्नपि प्रथमस्वरः अकारो[1] योजितः। तथा च वयमक्षराण्येव लिखामो न तु वर्णान्, अत एव चाक्षरमालेति व्यवहरामो न तु वर्णमालेति। यद्यप्यक्षराणां वर्णैरारब्धत्वात् वर्णानामेव लिपिभिः (नादरूपा- -क्षरस्मारके रेखावितानरूपैः चिह्नैः) विन्यासो न्यायः, तथापि व्यञ्जनानां स्वरपरतन्त्राणां स्वयमुच्चरितुमशक्यत्वात् अक्षराणामेव लिपिसञ्ज्ञितानि चिह्नानि पूर्वैः कल्पितानि। युरोपदेशीयास्तु स्वस्वभाषावर्णैरेव लिखन्ति, नत्वक्षरैः। यथा 'श्री' इत्येकां लिपिम् Sri तिसृभिर्लिखन्त्याङ्गलेयाः।

अविभज्य एको नादो वर्णः; केवलो व्यञ्जनसंसृष्टो वा स्वर एकोऽक्षरम् इति वर्णाक्षरयोर्भेदः। अनेन च केवलः स्वरो वर्ण इत्यक्षरमिति च द्वावपि व्यपदेशावर्हतीति स्फुटम्। केवलं तु व्यञ्जनं वर्ण एव। केवला एव स्वरा लिपिषु स्वस्वचिनह्नैर्निर्दिश्यन्ते, व्यञ्जनसंसृष्टास्तु चिह्नान्तरैरेव लिख्यन्ते। यथा -

| | | |
|---|---|---|
| क्+अ=क | क्+उ=कु | क्+ए=के |
| क्+आ=का | क्+ऊ=कू | क्+ऐ=कै |
| क्+इ=कि | क्+ऋ=कृ | क्+ओ=को |
| क्+ई=की | क्+ॠ=कॄ | क्+औ=कौ |

इत्यादि। 'क्' इति व्यञ्जनलिपीनामधो दक्षिणायता रेखा तेभ्य स्वरांशपृथक्करणं सूचयरति। यद्यपि लोके वुअवहारेष्वक्षरैरेवोपयोगस्तथापि वैयाकरणा वर्णैर्व्यवहरन्ति। अतश्च 'क' 'कि' 'कु' इत्याद्या लिपय एकैकचिह्नात्मिका अपि स्वरव्यञ्जनरूपवर्णद्वयघटिता इति व्याकरणाध्येतृभिः सविशेषमनुस्मरणीयम्।

अथाक्षरमालायाः परिगणितानां वर्णानां विभागः कथ्यते, तत्र स्वरव्यञ्जनात्मना द्विविधो महाविभाग उक्त एव। उच्चारणकालमात्रानुसारेण स्वरास्तावत् त्रिविधा -

१ एकया मात्रया अ, इ, उ इत्यादिवदुच्चार्यमाणो ह्रस्वः ;

२ आ, ई, ऊ इत्यादिवत् द्वाभ्यामुच्चार्यमाणो दीर्घः,

---

[1] वर्णेषु 'कारः' इत्यस्य योगो निर्देशसौकर्यार्थः। अकारः **अ** इत्ययं वर्णः।

३ अ$^{3}$,ई$^{3}$, उ$^{3}$ इत्यादिवत् तिसृभैरुच्चार्यमाणो प्लुतः।

एषु ह्रस्वदीर्घाभ्यामेव पदानि घटितानि। प्लुतस्तु काक्वादिवत् वाक्यमात्रदृष्टः स्वरविकारः। अत एव च तस्य लिपिषु चिह्नानि न कल्पितानि। स्वरेषु लृकरोऽतीव विरलः 'क्लृप्त' 'क्लृप्ति' इति द्वयोरेव पदयोर्दृष्टः। अस्य दीर्घः कुत्रापि नोपयुज्यते। ए, ऐ, ओ, औ एषां चतुर्णां ह्रस्वः सम्भवन् देश्यभाषासु दृष्टोऽपि संस्कृते नापेक्ष्यते, शेषा अ, इ, उ, ऋ एते चत्वार एव त्रिविधा अपि उपयुज्यन्ते। अत्र सूत्रितः पाणिनिना -

**१। ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (१-२-२७)**

ऊकलः, अच्, ह्रस्वदीर्घप्लुतः इतिच्छेदः। 'अच्' इति स्वरस्य पाणिनिकृता संज्ञा। उ, ऊ, उ$^{3}$ इतिवत् यस्य कालः सः स्वरः क्रमात् ह्रस्वदीर्घप्लुतसज्ञ इत्यर्थः। सङ्गीतशास्त्रप्रसिद्धं तारमन्द्रत्वभेदं निमित्तीकृत्य स्वराणां उदात्त, अनुदात्त, स्वरित इत्यन्यथापि त्रैविध्यमस्ति। अयमपि भेदः सूत्रकारवचनैरेवोच्यते -

**२। उच्चैरुदात्तः** (अच्) **। (१-२-२९)**

**३। नीचैरनुदात्तः । (१-२-३०)**

**४। समाहारः स्वरितः । (१-२-३१)**

उच्चः स्वरः उदात्तः, नीचोऽनुदत्तः, उच्चनीचमिश्रितः स्वरितः। अथानुनासिकोऽननुनासिकश्चेति स्थानभेदप्रयुक्तस्तृतीयोऽप्यस्ति **स्वराणां** विभागः। तत्राविकृतो यथास्थितः स्वरओऽननुनासिकः।

**(५) मुखनासिकावचनोऽनुनासिकः । १-१-८ ।**

मुखशब्देन मुखस्थितानि कण्ठादिस्थानानि गृह्यन्ते। मुखसहिता नासिका मुखनासिका, तया उच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः। नायं विभागः स्वराणामेव, **यवला**नामपि अनुनासिकाननुनासिकभेदो विद्यते। उदात्तानुदत्तस्वरितभेदः, अनुनासिकाननुनासिकभेदश्च स्वराणां लौकिकभाषायामिदानीं नातीवोपयुज्यते, पाणिनिस्वेतैरपि व्यवहरतीत्येव तत्स्वरूपं संक्षेपतोऽत्र वर्णितम्। लौकिकव्यवहारेषु ह्रस्वदीर्घाभ्यामेवातीवोपयोगः।

अथ व्यञ्जनानि विभज्यन्ते। तेषां स्वरवत् जातिभेदो नास्ति; सर्वाण्यप्येकविधानि। विभागस्तु तेषां सङ्घशः पृथक्कृत्य संज्ञाकरणमेव। तत्र **का**दयो **म**पर्यन्ताः २५ वर्णाः **'स्पर्शाः'** इति 'वर्ग्याः' इति चोच्यन्ते। **यरलवा**श्चत्वारो **'मव्यमाः' 'अन्तस्थाः'** वा। **शषसाः 'ऊष्म'** सञ्ज्ञिताः। स्पर्शेषु पञ्चभिः पञ्चभिरेको वर्ग इति पञ्च वर्गाः। ते च कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्ग इति आद्यवर्णैर्व्यपदिश्यन्ते। पाणिनिस्तु 'मात्रालाभः पुत्रलाभो दाक्षी- -पुत्रस्य पणिने' इति वचनमन्वर्थयन् उकारयोगेन वर्गाणां कु चु दु तु पु इति सञ्ज्ञा करोति। प्रथमा **खराः**, द्वेतीया **अतिखराः**, तृतीया **मृदवः**, चतुर्थो **घोषाः**, पञ्चमा **अनुनासिका** इति पञ्चापि वर्गाः समानरूपं कल्पिताः।

सर्वोऽयं वर्णविभागः प्रयत्नमुपाधिमवलम्ब्य क्रियते। को नाम प्रयत्नः? वर्णा हि मुखगततत्तत्स्थानेभ्यः श्वासोदीरणेनोत्पद्यन्ते। तत्र श्वासोदीरणार्थमास्थितः प्रयास एव प्रयत्न- -शब्देनोच्यते। स **चाभ्यन्तरोबाह्य**श्चेति द्विविधः। तत्र प्रथममभ्यन्तरो वर्ण्यते। स्वराणा- -मुच्चारणे श्वासो नियन्त्रणाभावादनर्गळः प्रसरतीति तेषां विवृतः प्रयत्नः। व्यञ्जनो- -च्चारणे त्वन्तर्नियन्त्रितो न निस्सार्यते श्वासः। अत एव व्यञ्जनानि स्वमुच्चारणाक्षमाणीत्युक्तम्। ऊष्मणामुच्चारणेऽपि किञ्चिदिव श्वासो विवृत इति तेषां ईषद्विवृत प्रयत्नः। तत्तत्स्थानेषु श्वासस्य बलवद्घट्टनेनोत्पद्यन्त इति स्पर्शानां **स्पृष्टः** प्रयत्न, अत एव तेषां स्पर्शसंज्ञा च। अन्तःस्थाना भूयानशो विवृत इति **ईषत्स्पृष्टः** प्रयत्नः। एवं विवृतः, ईषद्विवृतः, स्पृष्ट, ईषत्स्पृष्ट इति चत्वार आभ्यन्तरप्रयत्नाः। विवृतप्रयत्नवानपि ह्रस्व अकार औत्तराहैव्यञ्जनवत् (श्वासस्य) स्वारेणोच्चार्यत इति तस्य प्रयत्नः संवृत इत्युच्यन्ते। पाणिनिना च तथा समाम्नातम्।

**६ । अ आ । (८-४-६८)**

इत्यन्तिमेन सूत्रेण। अस्मिन्श्च प्रथमोऽकारो विवृतः, द्वितीयः संवृतः, संवृतत्वद्योतनाय मूर्द्धन्यङ्कुशचिन्हं निवेशितम्। विवृतोऽप्यकार उच्चारणकाले संवृतो भवतीत्यर्थः। उच्चारणमात्रकार्यमिदं संप्रदायाभावद् द्राविडैर्न सर्वत्रानुष्ठीयते। सन्त्यन्येऽपि

देशभेदादुच्चारणभेदाः। यथा - यत्र द्राविदानां वकारोच्चारणः सम्प्रदायस्तत्र वङ्गाः बकारमुच्चरन्ते। बवयोरभेदः, रलयोरभेदः, डळयोरभेद इत्यादिप्रपञ्चः सर्वोऽप्येवमुत्पन्नाः॥

बाह्यप्रयत्नस्त्वेकादधविधः, यन्निबन्धनः किल वर्गाणां खरातिखरादिभेदः ; स पुनर्नात्यन्तमुपयुक्त इति नात्र वर्ण्यते॥

अथ 'मुखनासिका...' इति सूत्रे परामृष्टानि वर्णानां स्थानानि विवृणुमः — अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। उपूपध्मानीयानामोष्ठौ। ऋटुरषाणां मूर्धा। ऌतुलसानां दन्ताः। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्टम्। वकारस्यदन्तोष्ठम्। ञमङणनानां नासिका च। नासिकानुस्वारस्य। विसर्गापरपर्यायो विसर्जनीयः अर्धहकारसदृशध्वनिः पदान्तरेफस्योच्चारणविशेषः। तद्भेदावन्वर्थसंज्ञौ जिह्वामूलीयोपध्मानीयौ। अर्धमकारसदृशध्वनिरनुस्वारः। विसर्गादयो न स्वतन्त्रा वर्णाः ; नैभिः किमपि पदमारभ्यते। पशूनां शृङ्गाणीव ते स्वराणामन्तेषु कदाचिदुपलभ्यन्त इत्येव। अत एवैतेऽक्षरसमाम्नाये न पठिताः। वर्णानां स्थानविभागः पट्टिकया प्रदर्श्यते —

| स्वराः | कण्ठः | तालु | ओष्ठौ | मूर्धा | दन्ताः | कण्ठतालु | कण्ठोष्ठम् |
|---|---|---|---|---|---|---|---|
| | अ | इ | उ | ऋ | ऌ | ए ऐ | ओ औ |
| खराः | क | च | प | ट | त | | |
| अतिखराः | ख | छ | फ | ठ | थ | | |
| मृदवः | ग | ज | ब | ड | द | | |
| घोषाः | घ | झ | भ | ढ | ध | | |
| अनुनासिकाः | ङ | ञ | म | ण | न | | |
| मध्यमाः | ... | य | व | र | ल | | |
| ऊष्माणः | ह | श | ... | ष | स | | |

उक्तौ स्थानाभ्यन्तरप्रयत्नौ ययोः सधारणौ, तौ वर्णौ मिथः सवर्णावुच्येते। तथा च सूत्रम् —

**७। तुल्यास्यप्रयत्नं सवर्णम्। (१-१-९)**

आस्यशब्देन मुखगतस्थानान्युच्यन्ते। स्थानप्रयत्नसामन्येऽपि —

**८। नाज्झलौ। (१-१-१०)**

स्वरव्यञ्जनयोर्न मिथः सावर्ण्यम्। अयमत्र फलितोऽर्थः — स्थानप्रयत्नभिन्नोपाधिना यो ववर्णोऽनेकधा भिद्यते। तस्य भेदप्रभेदा मिथः सवर्णा इति। तादृशाश्च भेदाः स्वर्णानां मध्यमानां चैव ; अतः एकस्यैव स्वरस्य ह्रस्वदीर्घादयो मिथः सवर्णाः ; एवमनुनासिका अननुनासिकाश्च यवला मिथः सवर्णाः। वर्णान्तरेषु सावर्ण्यस्य

न प्रसक्तिः। सवर्णेशु भेदेषु एकस्य[2] विहितं कार्यं अन्यस्यापि[3] कर्तव्यं। यथा — अकारस्य यद्विधीयते तद् आकारस्यापि कर्तव्यम्। उकारस्य विहितम् ऊकारस्यापीत्यादि। यत्र पुनरेकस्यैव[4] भेदस्य विधिर्विवक्ष्यते, तत्र स्वरेषु तकारं योजयत्याचर्यः। यथा — अत्, इत्, एत् इत्यादि। एवं[5] च अ = सर्वविधोऽप्यकारः ; अत् = ह्रस्वः अकारः। इ = सर्वविधोऽपीकारः ; इत् = ह्रस्व इकार इत्यादि ॥

लौकिकीमत्र प्रदर्शितामक्षरमालां पाणिनिः क्रमभेदं कृत्वा सूत्रात्मना बध्नाति। यानि (सूत्राणि)

१ महेश्वरादधिगतानीत्यैतिह्यात् **माहेश्वरसूत्राणी**ति,

२ अक्षरपाठरूपत्वात् **अक्षरसमाम्नाय** इति,

३ प्रत्याहाराख्यसंकेतोपयोगित्वात् **प्रत्याहारसूत्राणि**ति,

४ चतुर्दशसंख्याकत्वात् चतुर्दशसूत्रीति च व्याह्रियते। तानि चेमानि —

| | | | | | | |
|---|---|---|---|---|---|---|
| **१.** | **अ** | **इ** | **उ** | **( ण् )** | | |
| **२.** | **ऋ** | **ऌ** | **( क् )** | | | |
| **३.** | **ए** | **ओ** | **( ङ् )** | | | |
| **४.** | **ऐ** | **औ** | **( च् )** | | | |
| **५.** | **[ ह ]** | **य** | **व** | **र** | **( ट् )** | |
| **६.** | **ल** | **( ण् )** | | | | |
| **७.** | **ञ** | **म** | **ङ** | **ण** | **न** | **( म् )** |
| **८.** | **झ** | **भ** | **( ञ् )** | | | |

---

[2] व्यापकजात्याक्रान्तस्य।

[3] व्यापकजात्याक्रान्तस्यापि।

[4] उपात्तधर्मसमानाधिकरणजात्याक्रान्तस्यैव।

[5] यथा स्थूला वा, कृशा वा, श्वेता वा गोर्गौरेव ; तथा ह्रस्वो वा, दीर्घो वा, उदात्तो वा, अनुदात्तो वा अकारोऽकार एवेति स्वरा जात्या ग्राह्याः। कृशा गौरित्यादिवद्विशेषणसय विवक्षायां तु तत्स्थाने 'अत्' 'आत्' 'इत्' 'ईत्' इति ह्रस्वदीर्घौ तकारं परं कृत्वा उच्यत इति व्यवस्था तन्त्रेऽस्मिङ्कृतेति तत्त्वम्।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ९. | घ | ढ | ध | (ष्) | | | | |
| १०. | ज | ब | ग | ड | द | (श्) | | |
| ११. | ख | फ | छ | ठ | थ | च | ट | त | (व्) |
| १२. | क | प | (य्) | | | | | |
| १३. | श | ष | स | (र्) | | | | |
| १४. | ह | (ल्) | | | | | | |

अत्र चायं रचनाक्रमः — प्राधान्यात् प्रथमं स्वराः। तत्र अ, इ, उ इति मूलस्वरैः प्रथमं सूत्रम्। रेफलकाररोपव्यञ्जनांशोपकृउताभ्याम् ऋ-ऌ-भ्यां द्वितीयम्। अ+इ=ए ; अ+उ=ओ ; इति मूलस्वरद्वयसंकीर्णाभ्याम् ए-ओ-भ्यां तृतीयम्। अ+अ=आ ; आ+ए=ऐ ; आ+ओ=औ इति संकीर्णाकारविशिष्टसंश्लिष्टरूपाभ्याम् ऐ-औ-भ्यां चतुर्थम्। ए,ओ,ऐ,औ इत्येते स्वराः संकररूपत्वात् संध्यक्षराणीत्युच्यन्ते। स्वरानन्तरं स्वराणां पूर्णव्यञ्जनानां च मध्यपतितत्वात् मध्यमव्यपदेशवाग्भिः यवरलैः पञ्चमषष्ठे सूत्रे। इ,उ,ऋ,ऌ इति स्वराणां यवरल इति मध्यमानां च सगर्भ्याणां भ्रातृणामिव कोऽपि सजातीयो धर्मः प्रकतमुपलभ्यते ; तत्र इ, उ, ऋ, ऌ इति स्वराणां क्रममनुसर्तुं यवरल इति (यरलव इति लौकिकक्रमात् भिन्नः) क्रम उपात्तः। मध्यमानन्तरं वर्ग्याः पठ्यन्ते। ते च सांप्रदायिकीं रीतिमुल्लङ्घ्य खराः पृथक्, अतिखराः पृथक् इत्यादि भङ्ग्या सङ्घीकृत्य (अनुनासिकः, घोषः, मृदुः, अतिखरः, खर इति) व्युत्क्रमेण परिगणिताः। वर्ग्येभ्यः परम् ऊष्माणः पठिताः। अत्र हकार एको व्यञ्जनानामादावन्ते चेति द्विरुपात्तः। सूत्रसीवने च मध्येमध्ये विच्छेदद्योतनार्थमिव ण्, क्, ङ् इत्यादयः केवलव्यञ्जनरूपा ग्रन्थयो निवेशिताः। अन्ते श्रूयमाणानामेषां केवलव्यञ्जनानां ‘इत्’ इति संज्ञा कृता। अन्यत्रापि (आगमादेश- प्रत्ययादिषु) इत्संज्ञितानि व्यञ्जनान्याजोयत्याचार्यः। इदं नानाप्रकराणि प्रयोजनान्युद्दिश्य क्रियते। अक्षरसमाम्नाये तावत् इतां प्रत्याहारः प्रयोजनम्। प्रत्याहारो नाम मध्यपतितानां ग्रहणाय आद्यन्तयोर्मेलनम्। तथा हि — उद्दिष्तमेकमक्षरमादाय तेन सह सूत्रान्तपठितानामितां योजनेन संपादितः शब्दो मध्यगतानां वर्णानां संज्ञा भवति, यथा — ‘अण्’ इति

अ-इ-उ-वर्णानां संज्ञा ; 'अक्' इति ऌपर्यन्तानाम्, 'अच्' इति औपर्यन्तानाम्। एवं 'इक्' इति इ उ ऋ ऌ इत्येषाम् ; 'यण्' इति मध्यमानाम् ; 'जश्' इति मृदूनां ; 'झष्' इति घोषाणाम् ; 'शर्' इत्यूष्माणां च संज्ञा भवति। अत एव 'अच्' इति स्वराणां प्रत्याहारः, 'हल्' ईति व्यञ्जनानाम्, 'अल्' इति वर्णमात्रस्य। हकारस्य द्विरुपादानं तस्य 'अट्' - प्रत्याहारेण, 'शल्' प्रत्याहारेण च ग्रहणार्थम्। अनियतसंख्याकैर्वर्णैः सूत्रकरणमपि प्रत्याहारसौकर्यार्थमेव। अत्र चार्थे सूत्रम् —

### ९। आदिरन्त्येन सहेता । (१-१-७१)

आदित्वेनोपत्तो वर्णः अन्त्येन इता सह उच्चार्यमाणो मध्यगानां स्वस्य च संज्ञा भवति। प्रत्याहारैर्वर्णग्रहणे मध्यपतितान्यपि इत्संज्ञकानि व्यञ्जनानि न गृह्येन्ते। पुष्पैर्मालाग्रथने गुणेन यवदुपक्रियते तावदेव वर्णैः प्रत्याहारकरणेऽपीति तेष्वश्रद्धैव। अभ्यासार्थं प्रचुरप्रयोगाः केऽपि प्रत्याहाराः स्वग्राहैर्वर्णैः सहाधः प्रदर्शिताः —

| | | | |
|---|---|---|---|
| १. अण् | इति | मूलस्वराणां | प्रत्याहारः, |
| २. अक् | इति | सन्ध्यक्षरभिन्नानां स्वराणां | प्रत्याहारः, |
| ३. एच् | इति | संध्यक्षराणां | प्रत्याहारः, |
| ४. अट् | इति | स्वराणां हस्य लभिन्नमध्यमानां च | प्रत्याहारः, |
| ५. झल् | इति | वर्गेष्वाद्यानां चतुर्णामूष्मणां च | प्रत्याहारः, |
| ६. खर् | इति | खरातिखरोष्मणां | प्रत्याहारः, |
| ७. चर् | इति | खरोष्मणोः | प्रत्याहारः इत्यादि। |

एवं प्रत्ययादिष्वपि इत्करणेन तत्तदस्ति प्रयोजनम्। अथ कीदृशा वर्णा इत इति विवेचनार्थमित्संज्ञाविधिरुच्यते॥

### १०। उपदेशेऽजनुनासिक इत् । (१-३-२)

शास्त्रप्रवर्तकानां प्रत्यक्षमाख्यान**मुपदेशः**। स च प्रायः आगमादेश-धातुगणपाठप्रत्ययप्रत्याहारसूत्ररूपः। तेषु अनुनासिको योऽच् (स्वरः) स इत् स्यात्। अनुनासिकत्वेनोच्चारणं कालक्रमेण लुप्तम् ; इदानीं यस्य इत्संज्ञा अपेक्षिता तस्य स्वरस्य

अनुनासिकत्वं प्रतिज्ञायत इत्येवं संप्रदायः। धातुपाठे ‘एध’ ‘स्पर्ध’ ‘वद’ इत्यादिष्वकारः, ‘चक्षिङ्’ इत्यादाविकारः, ‘कटे’ इत्यादौ एकारः, ‘गुपू’ इत्यादावूकारः इत्यादय इत्संज्ञाः। ‘नुक्’, ‘नुट्’, ‘पुक्’, ‘नुम्’ इत्याद्यागमेषु उकार इत्। प्रत्ययादिषु च अनुनासिकत्व-प्रतिज्ञानेनाचामित्संज्ञा विरलास्ति। ‘शतृ’- प्रत्यये ऋकारः ‘मतुप्’-प्रत्यये उकारश्च इत्॥

**११। हलन्त्यम्। (१-३-३)**

उपदेशेऽन्त्यं हल् (व्यञ्जनम्[6]) इत् स्यात्। अत एव प्रत्याहारसूत्रेषु अन्त्यव्यञ्जनानां णकारादीनामित्संज्ञा। एवं ‘नञ्’ ‘आङ्’ ‘माङ्’ इत्यादिनिपातेषु, ‘कृञ्’ 'चक्षिङ्’ इत्यादिधतुषु च अन्त्या हल इत्संज्ञाः॥

अथ प्रत्ययेषु कुत्रचिदन्त्यस्य हल इत्संज्ञाया अनपेक्षितत्वान्निषेधमारभते —

**१२। न विभक्तौ तुस्माः। (१-३-४)**

विभक्तिप्रत्ययेषु तदादेशेषु च सकारमकारौ विभक्तिप्रत्ययादेशेषु तवर्ग्याश्च अन्त्या अपि नेत्संज्ञकाः। ‘किमोऽतः’ तकारस्य विभक्ति- प्रत्ययेऽपीत्संज्ञास्ति। अनेन ‘भ्यस्’ ‘भ्याम्’ ‘ध्वम्’ ‘स्मात्’ ‘स्मिन्’ इत्यादिविभक्तिषु तदादेशेषु चान्त्यस्य हलो न इत्संज्ञा।

**१३। आदिर्ञिटुडवः। (१-३-५)**

धातूनामादौ ‘ञि’ ‘टु’ ‘डु’ इत्येतान्यक्षराणीत्संज्ञानि। यथा — ञिमिदा स्नेहने। टुणदि समृद्धौ। डुकृञ् करणे।

**१४। षः प्रत्ययस्य। (१-३-६)**

प्रत्ययादिः षकर इत्। यथा — ष्यञ्, ष्फ इत्यादौ।

**१५। चुटू। (१-३-७)**

प्रत्ययादी चवर्गटवर्गावित्संज्ञौ। यथा — जरु, ञ्यः,टच्, डण् इत्यादौ।

**१६। लशक्वतद्धिते। (१-३-८)**

नामपदेभ्यो नमान्तरवुत्पादनार्थकाः प्रत्ययास्तद्धिता इत्युच्यन्ते।

---

[6] इता प्रत्याहारस्य प्रत्याहारेण इतश्च विधानं शाकटायनादिप्राचीनवैयाकरणसंकेतावलम्बेन। अन्यत्रापि ‘औङ आपः’ इत्यादौ प्राचीनसंज्ञाभिर्व्यवकरत्याचार्यः। अतो नान्योन्याश्रयदोषस्यात्र प्रसक्तिः।

तद्धितभिन्नप्रत्ययाद्या लशकवर्गा इतः स्युः। यथा — 'ल्युट्', 'शस्' 'क्विप्' 'खश्' 'घञ्' इत्यादौ।

**१७। तस्य लोपः। (१-३-९)**

इतो लोपः स्यात्। इत्संज्ञानां वर्णानामक्षराणां वा नाश्ः कार्यः ; ते सिद्धेषु पदेषु नोच्चारणीयाः इत्यर्थः। चिह्नमात्रमित्, न तु प्रत्ययादीनां वस्तुतो घटको वर्ण इति तात्पर्यम्॥

संज्ञान्तराण्यपि बहुत्रोपयुक्तानि प्रकरणेऽस्मिन् कथ्यन्ते —

**१८। वृद्धिरादैच्। (१-१-१-)**

'**आत्**' इति तपरकरणं निर्देशसौकर्यार्थम्। **ऐच्** प्रत्याहारः। आ, ऐ, औ एते प्रत्येकं **वृद्धि**संज्ञिकाः॥

**१९। अदेङ् गुणः। (१-१-२)**

'**अत्**' इति ह्रस्वमात्रग्रहणाय निर्देशसौकर्याय च तपरो निर्देशः। अ, ए, ओ एते प्रत्येकं **गुण**संज्ञकाः॥

**२०। हलोऽनन्तराः संयोगः। (१-१-७)**

हलः स्वरैः कालेन वा अव्यवहिताः समुदिताः **संयोग**संज्ञकाः॥

यथा — स्त, श्च, क्ष, स्त्री, क्ष्म्या, त्स्र्य इत्यादयः।

**२१। अचोऽन्त्यादि टि। (१-१-६४)**

अचां मध्ये योऽन्यः स आदिर्यस्य स वर्णः वर्णसमूहो वा टिसंज्ञः स्यात्। स्वरान्त्येषु शब्देष्वन्त्यस्वरः, व्यञ्जनान्तेष्वन्त्यव्यञ्जनं स्वपूर्वस्वरमिलितं च टिसंज्ञमित्यर्थः। यथा —

| **शब्दः** | **टिः** | **शब्दः** | **टिः** |
|---|---|---|---|
| हरि इत्यस्य | इ | प्रत्यक् इत्यस्य | अक् |
| गुरु इत्यस्य | उ | सरस् इत्यस्य | अस् |

| | | | |
|---|---|---|---|
| भोस् इत्यस्य | ओस् | अजागर्त् इत्यस्य | अर्त् |
| किम् इत्यस्य | इम् | ऊर्क् इत्यस्य | ऊर्क् |

**२२। अलोऽन्त्यात् पूर्व उपधा। (१-१-६५)**

उपान्त्यो वर्ण उपधासंज्ञः। यथा —

हरि इत्यत्र रेफ उपधा। भोस् इत्यत्र ओकार इत्यादि।

**२३। परः संनिकर्षः संहिता। (१-४-१०९)**

मध्ये विच्छेदं विना वर्णानां धारारूपेणोच्चारणं **संहिता।** यथा श्लोक- वचनादौ। एकैकस्य पदस्य पृथक् पृथक् कथने संहिता नास्ति॥

**२४। विरामोऽसानम्। (१-४-११०)**

स्पष्टार्थमिदं व्याख्यां नापेक्षते। गद्येषु वाक्यविरतिः, पद्येष्वर्ध-विरतिश्चावसानत्वेन गण्यते॥

इति संज्ञाप्रकरणम्।

———————————————————

## अथ परिभाषाप्रकरणम्।

लाघवाय संदेहवारणाय च शास्त्रेषु स्वातन्त्र्येण निबद्धा व्यवस्थाः **परिभाषा**शब्देनोच्यन्ते। परिभाषाज्ञानं विना विधिसूत्रार्थबोधो न स्यादिति ता व्याख्यायन्ते —

सूत्रैस्तावत् आगमः, आदेशः, प्रत्यय इति प्रायस्त्रिविधानि कार्याणि विधीयन्ते। तत्र प्रत्ययः प्रकृतेः पर एव कर्तव्य इति नियमः। आगमाः कदाचिदादौ, अन्यदान्ते, जातुचिन्मध्ये। आदेशः कदाचिदादेः, अन्यदान्त्यस्य, जातुचित् सर्वस्य च। तत्र नियमः परिभाषाभिः क्रियते। प्रथमम्मागमानां देशनियमः —

**२५। अद्यन्तौ टकितौ। (१-१-४६)**

टकौ इतौ ययोस्तौ टकितौ, तौ अद्यन्तौ स्तः। टकाररूपण इता चिह्नित आगम आदौ कार्यः। ककाररूपेण इता चिह्नितोऽन्ते कार्य इत्यर्थः। टकारमनुबन्धं दृष्ट्वा आदौ; ककारमनुबन्धं दृष्ट्वा अन्ते चागमं कुर्यादिति व्यवस्थास्वरूपम्॥

**२६। मिदचोऽन्त्यात् परः। (१-१-४७)**

यस्य मकारेण इत्कृतः सः अन्त्यस्वरात् परः कार्यः। तथा च मित् हलन्तेष्वन्त्याद्धलः पूर्वं निवेशनीयः, अजन्तेष्वन्त एव। आदेशानां नियमोऽनुपदं वक्ष्यते। अष्टध्यायीक्रमानुरोधेन मध्यगतानि परिभाषासूत्राणि प्रथमं व्याख्यायन्ते॥

**२७। एच इज्घ्रस्वादेशे। (१-१-४८)**

इक् ह्रस्वादेशे इति च्छेदः। ए, ओ, ऐ, औ इति संन्ध्यक्षराणां ह्रस्वा न सन्तीत्युक्तम् ; तेषां ह्रस्वो यदि विधीयते तर्हि तत्स्थाने इक् (इ उ ऋ ऌ) प्रयोक्तव्यः। इदमुदाहरणस्थलेषु स्फुटीकरिष्यते ॥

**२८। षष्ठी स्थानेयोगा। (१-१-४९)**

'स्थाने' इति पदस्य योगो यस्याः, सा स्थानेयोगा। 'तस्य स्थाने' इति वक्तव्ये पाणिनिः 'तस्य' इति षष्ठीमेव प्रयुङ्क्ते, 'स्थाने' इति पदमध्याहार्यमित्यर्थः। अयं संप्रदाय आदेशविधिषूप्युज्यते। यथा — 'अस्तेर्भूः' इति सूत्रस्य अस्तेः स्थाने भूरित्यर्थः॥

**२९। स्थानेऽन्तरतमः। (१-१-५०)**

स्थाने चान्तरतमः (सदृशतमः) आदेशः कार्यः। यत्र अमुक आदेश इति वर्णविशेषमनुक्त्वा पूर्वसवर्णः, परसवर्णः, मूर्धन्यः, यण् (प्रत्याहारः) इत्यादि सामान्यरीत्या आदेशः कथ्यते, तत्र स्थानप्रयत्नाभ्यां योग्यतां परीक्ष्य सदृशतमो वर्ण आदेशत्वेन ग्राह्य इत्यर्थः॥

**३०। उरण् रपरः। (१-१-५१)**

'उः' इति 'ऋ' इत्यस्य षष्ठ्यन्तं रूपम्। ऋकारस्थाने आदिश्यमानः अण् (अ इ उ) रेफं परं कृत्वा उच्चार्यः। ऋकारस्य अ, इ, उ इत्येते आदेशाः क्रमात् अर्[7], इर्, उर् इत्येवं रूपा ग्राह्या इत्यर्थः॥

**३१। अलोऽन्त्यस्य। (१-१-५२)**

आदेशः सर्वोऽपि अन्त्यस्य अलः (= वर्णस्य) कार्यः॥

**३२। ङिच्च। (१-१-५३)**

ङकारेण इता चिह्नितोऽप्यादेशः अन्त्यस्यैव कर्तव्यः। पूर्वेणैव सिद्धे पुनर्विधानमिदं किमर्थमित्यनुपदमेव स्पष्टीभविष्यति॥

**३३। आदेः परस्य। (१-१-५४)**

'अलोऽन्त्यस्य इत्युक्तम् ; किं तु यत्रादेशः कस्मादपि परस्य विधीयते तत्र तस्य (परस्य) आदेरेव कर्तव्यः ; न त्वन्त्यस्य। यथा — अहन्शब्दस्य रेफ इति विधौ 'अहन्' इति शब्दान्त्यस्य नकारस्यादेशः। 'उत्' इत्युपसर्गात् परस्य स्तम्भ इत्यस्य तकार इति विधौ तु 'स्तम्भ' इति शब्दस्यादेः सकारस्यादेशः॥

**३४। अनेकाल् शित्सर्वस्य। (१-१-५५)**

अनेकवर्णः, शकारेण इता चिह्नितस्चादेशः समग्रस्य स्थानिनः कर्तव्यः। यथा — 'दृश्' इति धातोः 'पश्य' इत्यादेशः अनेकाल्त्वात् समग्रं स्थानिनमपनीय तत्स्थानमाक्रामति। एवम् इदंशब्दस्य तृतीयादिविभक्तिषु अश् इति शिदादेशोऽपि सर्वादेशो भवति। 'अलोऽन्त्यस्य' इत्यादिभिश्चतुर्भिः सूत्रैः आदेशानं देशव्यवस्था क्रियते। सा चैवम् — भावरूप आदेशस्तावत् एकाल्, अनेकाल् इति द्विविधः। तत्र एकाल् अन्त्यस्य कार्यः, अनेकाल् तु सर्वस्य इति सामन्यतो नियमः। अथ विशेषः — एकाल् अप्यादेशः शिच्चेत् सर्वस्य; यतःकुतश्चित् परस्य विधीयमानस्तु आदेः; अनेकालपि ङिच्चेदस्न्त्यस्येति। तथा च स्वघटकानां वर्णानां संख्यैव आदेशस्य देशं व्यवस्थापयति।

---

[7] ऋ-स्वरे हि रेफांशः स्फुटं श्रूयते। अतस्तदादेशा रेफसंस्कृतपुच्चारणमर्हन्तीति न्याय्यमेवैतत्। अणादेश ऋकारस्य रेफांशं पृथक्कृत्यैव कार्य इति हृदयम्। एवं ऌकारादेशो लकारं पुरस्कृत्योच्चारणीयः।

यत्र पुनस्तद्व्यभिचारोऽपेक्षितस्तत्र शकारङकारावनुबन्धौ प्रयुज्येते इति संकेतमाचार्यः करोति॥

**३५। तस्मिन्निति निर्दिष्टे पूर्वस्य। (१-१-६६)**

**३६। तस्मादित्युत्तरस्य। (१-१-६७)**

पूर्वपरयोः पूर्वस्य कार्ये कर्तव्ये परं सप्तम्यन्तं क्रियते ; परस्य तु कार्ये कर्तव्ये पूर्वं पञ्चम्यन्तं क्रियते। यथा — मित्रशब्दे परे विश्वशब्दस्य दीर्घं विधातुं 'विश्वस्य मित्रे दीर्घः' इत्याचार्यः सूत्रयेत् ; मित्रशब्दस्य विश्वशब्दे पूर्वे पुल्लिङ्गत्वं विधातुं 'विश्वान्मित्रं पुमान्' इति सूत्रयेत्। 'मित्रे' इत्यत्र 'मित्रे परे' इति, 'विश्वात्' इत्यत्र 'विश्वात् परम्' इति च परशब्द उभयत्राप्यध्याहार्य इति तात्पर्यम्। सप्तम्यन्तं दृष्ट्वा पूर्वस्य कार्यं कुर्यात्, पञ्चम्यन्तं दृष्ट्वा परस्या कार्यं कुर्यादिति संकेतस्वरूपम्॥

**३७। स्वं रूपं शब्दस्याशब्दसंज्ञा। (१-१-६८)**

सूत्रेऽस्मिन् (१) 'स्वं रूपं शब्दस्य' इत्यंशेन विधिः क्रियते। (२) 'अशब्दसंज्ञा' इत्यंशेन स एव विधिर्निषिध्यते। (१) पूर्वोक्ते 'विश्वस्य मित्रे' इत्युदाहरणे विश्वमित्रशब्दावेव ग्राह्यौ, न तु कृत्स्नबन्धू इति तयोः पर्ययौ। (२) अशब्दसंज्ञा = शब्दसंज्ञां वर्जयित्वा। शब्दसंज्ञेत्यस्य शब्दशास्त्रकृता संज्ञेत्यर्थः। 'शास्त्रे' 'गुणः' 'वृद्धिः' इत्याद्याः याः सांकेतिकसंज्ञाः कृतास्तत्र तु अर्थ एव ग्राह्यो न शब्दरूपमित्युक्तस्य विधेः संकोचनम्, तथा च गुणवृद्ध्यादिविधौ अदेङ् गुणः, वृद्धिरादैच् इत्यादीन् संकेतितानर्थानेव गृह्णीयात् ; अन्यत्र तु शब्दरूपम्॥

**३८। अणुदित् सवर्णस्य चाप्रत्ययः। (१-१-६९)**

अण् इति 'लण्'-सूत्रनकारेण प्रत्याहारः, स्वरान् मध्यमांश्च प्रत्याहरति। स्वरमध्यमौ, उकारेण इता योजितश्च वर्णः स्वस्य सवर्णस्य च ग्राहकः स्यात्। 'इक्' 'अच्' इत्यादिप्रत्याहारैः सूत्रानुक्ता दीर्घाद्या अपि ग्राह्याः। व्याख्यातमिदं पूर्वमेव। 'अप्रत्ययः' इति निषेधांशः परं व्याख्यातव्योऽस्ति। प्रत्ययरूपस्तु स्वरो न सवर्णग्राहकः

इत्यक्षरार्थः। प्रत्यय इति विधेयोपलक्षणम्। तेन आगमादेशयोरपि निषेधेऽन्तर्भावो ज्ञेयः। तदेतदुक्तम् —

**॥*॥ 'भाव्यमनेन सवर्णानां ग्रहणं न'**

इति। 'अ' इति प्रत्ययः, आदेशः, आगमो वा विधीयते चेत् तत्र 'आ' इति दीर्घस्वरूपोऽपि सोऽस्त्विति नापादनीयमित्यर्थः॥

**३९। तपरस्तत्कालस्य। (१-१-७०)**

ये पुनः स्वराः निर्दिष्टमात्रका एवापेक्षितास्ते तकारं परं कृत्वा उच्चार्यन्ते। अयमपि संकेत उक्त एव॥

**९। आदिरन्त्येन सेहता। (१-१-७१)**

इदं सूत्रं संज्ञाप्रकरणे प्रसङ्गवशाद्व्याख्यातम् ॥

**४०। येन विधिस्तदन्तस्य। (१-१-७२)**

विशेषणेन तदन्तं ग्राह्यम्, यथा — 'आतो धातोः' इत्युक्ते आदन्तस्य धातोरित्यर्थः॥

**४१। यथासंख्यमनिदेशः समानाम्। (१-३-१०)**

उद्देश्यानुद्देश्ययोः संख्यासाम्ये उद्देशक्रमेणैव प्रवृत्तिः। चतुर्णां स्थानिनां चत्वार आदेशाश्चेदुच्यन्ते, प्रथमस्य प्रथमो द्वितीयस्य द्वितीयो इति क्रमो ग्राह्य इत्यर्थः॥

**४२। स्वरितेनाधिकरः। (१-३-११)**

ग्रन्थेषु पूर्वोत्तरवाक्ययोः संबन्धः सर्वजनविदितः। क्वचिदुत्तर-वाक्यस्यान्वयपूर्तये पूर्ववाक्यात् पदान्यायोजनीयान्यपि स्युः। एवं पूर्ववाक्यस्थ-पदानामुत्तरवाक्ये उपस्थितिः **अनुवृत्ति**रित्युच्यते। अनुवृत्तिमात्रफलकान्यपि कदाचित् सूत्रणि क्रियन्ते — **यान्यन्धिकार** इति व्यपदिष्टानि। अनिष्टस्य पदस्यानुवृत्तिर्मा भूदिति स्वरितस्वरेणोच्चार्यमाणं पदं सूत्रान्तरेष्वनुवर्तनीयम् इत्याचार्यः संकेतयति। किं तु संप्रदायोऽयं कालक्रमाल्लुप्तः। संप्रति यस्य पदस्यानुवृत्तिरिष्टा तस्य स्वरितत्वं प्रतिज्ञायत इत्येव॥

इति परिभाषाप्रकरणम्।

————————————————————

## अथ संधिप्रकरणम्॥

प्रकृतिप्रत्यययोः पदयोर्वा मेलने पूर्वान्त्यवर्णस्य परादिवर्णस्य उभयोर्वा ये विकारा प्त्पद्यन्ते, तानि सन्धिकार्याणि। विकारश्च आदेशः, आगमः, द्वेत्वम्, लोप इत्येषामन्यतम एव। सन्धिस्तावत् त्रिविधः संभवति — पदमध्यमात्रे कर्तव्यः, पदान्तमात्रे कर्तव्यः, उभयत्रापि कर्तव्य इति। तत्र पदमध्यमात्रे कर्तव्यः संधिर्विरल एव ; प्रकृतिप्रत्ययविवेचनं चापेक्षते। संधिप्रकरणेऽस्मिन् उभयसंधिः पदान्तसंधिश्चोच्यते। तत्र च येत्र स्वरो विकार्यः सः स्वरसंधिः प्रथमं कथ्यते —

स्वरसंधिः।

### ४३। इको यणचि। (६-१-७७)

'इकः' इति षष्ठ्यन्तम् ; अतः (२८) इकः स्थाने इत्यर्थः। 'अचि' इति सप्तम्यन्तम् ; अतः (३५) अचि परे इत्यर्थः। सूत्रघटकं पदत्रयमपि प्रत्याहाररूपम्; अतस्तत्तद्वर्णाः ग्राह्याः। एवं च स्वरेष्वेकस्मिन् परे इ, उ, ऋ, ऌ एषां वर्णानां स्थाने, य्, व्, र्, ल् एते वर्णाः आदेशाः स्युरिति सूत्रार्थः संपद्यते। **यथासंख्यपरिभाषया** (४१) इकारस्य यकारः, उकारस्य वकारः, ऋकारस्य रेफः, ऌकारस्य लकारः इत्युद्देशक्रमेणादेशाः प्रवर्तन्ते। 'अचि' इति निमित्तस्य तु संख्यासाम्याभावान्न कोऽपि क्रमः। यथा —

दधि + अर्थं = द ध् य् अर्थं = दध्यर्थम्।

मधु + अर्थं = म ध् व् अर्थं = मध्वर्थम्।

पितृ + अर्थं = पि त् र् अर्थं = पित्रर्थम्।

गम्ॡ + अर्थं = ग म् ल् अर्थं = गम्लर्थम्।

'आनुदित्रवर्णस्य च' (३८) इति परिभाषाबलात् दीर्घ ईकारादिरपि इगच्प्रत्याहाराभ्यां ग्राह्यः। तेन —

सुधी + ऊहितं = सुध्यूहितं

वधू + आननं = वध्वाननं

कृ + आकृतिः = क्राकृतिः

लृ + आपत्तिः = लापत्तिः

इत्यादावपि यण् सिध्यति।

### ४४। एचोऽयवायवः। (६-१-७८)

अचीति पूर्वसूत्रादनुषज्यते। अय्, अव्, आय्, आव् इत्येषां द्वन्द्वे अयवायाव इति प्रथमाबहुवचनम्। ए, ओ, ऐ, औ एषाम् अचि परे क्रमात् अय्, अव्, आय्, आव् इत्यादेशाः स्युः॥

**पदमध्ये**

हरे + ए = हरय् ए = हरये

गुरो + ए = गुरव् ए = गुरवे

नै + अकः = नाय् अकः = नायकः

पौ + अकः = पाव् अकः = पावकः

**पदान्ते**[8]

हरे + इह = हरय् इह = हरयिह

गुरो + इह = गुरव् इह = गुरविह

तस्मै + उक्तं = तस्माय् उक्तं = तस्मायुक्तं

तौ + एव = ताव् एव = तावेव

अथ पञ्चभिः सूत्रैः अयवायावादेशा हलि परेऽपि कुत्रचिद्विधीयन्ते। तानि प्रकरणान्तरे व्याख्यास्यामः॥

### ४५। एकः पूर्वपरयोः। (६-१-८४)

अधिकारसूत्रमिदं न तु विधायकम्। इतः परं विधीयमना आदेशाः पूर्वपरयोर्मिलितयोः कर्तव्या इत्यनेन सूत्रेण प्रतिज्ञायते॥

---

[8] पदान्तसंधौ यवयोर्विकल्पेन लोपो वक्ष्यते। अतः 'हर एहि' इत्याद्यपि रूपं भवति।

**[ ४६। अन्तादिवच्च । (६-१-८५)**

एकादेशोऽयं पूर्वस्यान्तवत्परस्यादिवच्च गणयितुं शक्यते। एदमपि एकादेशस्य स्वरूपकथनरूपत्वादधिकार एव। एवमुत्तरसूत्रमपि —

**४७। षत्वतुकोरसिद्धः। (६-१-८६)**

षत्वे तुकि च कर्तव्ये एकादेशविधिरसिद्धः स्यात्। अधिकारसूत्रद्वयस्यास्य प्रयोजनपुपरिष्टद्दर्शयिष्यते। सूत्रक्रमानिरोधेनैवैतदत्र व्याख्यातम्। प्रारम्भे बाला नैतत् पठन्त्विति कोष्ठकान्तर्निवेशितं प्रारम्भका निरस्यन्तु॥ ]

**४८। आद् गुणः। (६-१-८७)**

'आत्' इति 'अ' इत्यस्य पञ्चम्यन्तम्, तपरकरणाभावात् सर्वविधमप्यकारं गृह्णाति। 'इको यणचि' इत्यतः 'अचि' इत्यनुवर्तते; 'एकः पूर्वपरयोः' इत्यधिकृतं च। अतः अवर्णादचि परे पूर्वपरयोरेको गुण आदेश इति सूत्रार्थः। 'अदेङ् गुणः' (१९) इति संज्ञाकरणात् अ(ह्रस्वः), ए, ओ इत्येते स्वराः गुणशब्देन गृह्यन्ते। 'एकः पूर्वपरयोः' (४५) इत्यधिकारादत्र स्थानिनौ द्वौ; तयोः पूर्वः सर्वत्रापि अवर्णः ; परः सर्वोऽप्यच् इत्युक्तेऽपि इक् (इ, उ, ऋ, ऌ) एव विवक्षित इति उपरि स्पष्टीभविष्यति। एवं चात्र (१) अ-इ वर्णौ, (२) अ-उ वर्णौ, (३) अ-ऋ वर्णौ (४) अ-ऌ वर्णौ चेति चत्वारि द्वन्द्वानि स्थानिनः। अ, ए, ओ इति त्रय एवादेशाः। अतो यथासंख्यं कर्तुं नावकाशः। ततश्च 'स्थानेऽन्तरतमः' (२९) इति परिभाषितत्वात् कस्य कः सदृशतम इति परीक्षणीयमापतितम्। तत्र अवर्णस्य कण्ठः स्थानम् ; इवर्णस्य तालु ; एकारस्य कण्ठतालु इति स्थानसाम्यात् अ-इ वर्णयोः एकारो गुणः। एवम् अ-उ वर्णयोः ओकारः। ऋ-ऌ वर्णयोः अकार एव। तत्र ऋकारस्थाने आदिष्टः अकारः 'उरण् रपरः' (३०) इति परिभाषया 'अर्' इति रपरो भवति। ऌकारस्य तु तुल्यन्यायेन 'अल्' इति लपरः। अथ उदाहरणम् —

उप + इन्द्रः = उपेन्द्रः।

कुल + उचितम् = कुलोचितम्।

महा + ऋषिः = महर्षिः।

प्लुत + ऌकारः = प्लुतल्कारः।

### ४१। वृद्धिरेचि । (६-१-८८)

अवर्णादेचि परेवृद्धिरेकादेशः स्यात्। आ, ऐ, औ इति वृद्धिवर्णषु पूर्ववदान्तरतम्यात् अ+ए, अ+ऐ इत्यनयोः ऐकार आदेशः। अ+ओ, अ+औ इत्यनयोः औकारः। यथा —

तस्य +एव = तस्यैव। नृप+ऐश्वर्यम् = नृपैश्वर्यम्।

महा+ओजः = महौजः। धन+औत्सुक्यम् = धनौत्सुक्यम्।

अत्रेदमवधेयम् - उत्सर्गापवादन्यायमनुसृत्याचार्यः कार्याणि विदधाति। न्यायोऽयमविमृश्यकारीव प्रथमं व्यापकस्य सामन्यस्य विधेयं वेधाय पश्चादुद्बुद्ध इव विशेषविधीनारभमाणो विशेषसंकोचनेनातिव्याप्तिं परिहरति। तस्य च लौकिकोऽयं दृष्टान्तः — ब्राह्मणान् भोजयन् कोऽपि गृहस्वामी सूदानादिशति — (१) 'ब्राह्मणेभो दधि धीयताम्, (२) तक्रं कौण्डिन्याय' इति। अत्र महावक्य- पूर्वभागेण ब्राह्मणत्वसाधारण्यात् प्राप्तं कौण्डिन्यस्यापि दधिदानम्, तक्रदान- रूपविशेषविधिं कुर्वता उत्तरभागेन बाध्यते। एवं च पूर्ववाक्ये 'ब्राह्मणेभ्यः' इति सामान्यं कौण्डिन्यभिन्नत्वविशेषणेन संकोचितविषयं पर्यवस्यति। विषयस्यैकदेशसाम्ये अधिकदेशव्यापको विधिरुत्सर्गः, अल्पदेशव्यापकोऽपवादः। अथ न्यायः प्रकृते संचार्यते — आदचि गुणो विधीयते ; आदेचि वृद्धिः। अच् = अक् + एच्। अतोऽत्र गुणविधिरुत्सर्गः; वृद्धिविधिरपवादः। तेन च अपवादस्य विषयं परिहृत्यैवोत्सर्गः प्रवर्तते। एवं च (अच् - एच् = अक्) ; अच्तः एचि व्यपकलिते शिष्टः अक् एव गुणस्य विषयः। 'आदकि गुणः, एचि वृद्धिः' इति फलितम्। अवर्णस्याप्यपवादो वक्ष्यते॥

उक्ता एव स्वरसंधावुत्सर्गविधयः ; एभिः कृत्स्नो विषयो व्याप्त इति पट्टिकापर्यवेक्षणेन स्फुटं भविष्यति॥

<table>
<tr><th colspan="2">पूर्वः</th><th colspan="2">परः</th><th colspan="2">आदेशः</th><th>कस्येति</th><th>सूत्रम्</th></tr>
<tr><td colspan="2" rowspan="4">अ</td><td rowspan="4">इक्</td><td>इ</td><td>ए</td><td rowspan="4">गुणः</td><td rowspan="4">एकादेशः</td><td rowspan="4">आद्गुणः (१)</td></tr>
<tr><td>उ</td><td>ओ</td></tr>
<tr><td>ऋ</td><td>अर्</td></tr>
<tr><td>ऌ</td><td>अल्</td></tr>
<tr><td colspan="2" rowspan="4">अ</td><td rowspan="4">एच्</td><td>ए</td><td>ऐ</td><td rowspan="4">वृद्धिः</td><td rowspan="4">”</td><td rowspan="4">वृद्धिरेचि (२)</td></tr>
<tr><td>ओ</td><td>औ</td></tr>
<tr><td>ऐ</td><td>ऐ</td></tr>
<tr><td>औ</td><td>औ</td></tr>
<tr><td rowspan="4">इक्</td><td>इ</td><td colspan="2" rowspan="4">अच्</td><td>य्</td><td rowspan="4">यण्</td><td rowspan="4">पूर्वादेशः</td><td rowspan="4">इको यणचि (३)</td></tr>
<tr><td>उ</td><td>व्</td></tr>
<tr><td>ऋ</td><td>र्</td></tr>
<tr><td>ऌ</td><td>ल्</td></tr>
<tr><td rowspan="4">एच्</td><td>ए</td><td colspan="2" rowspan="4">अच्</td><td>अय्</td><td rowspan="2">यान्तः</td><td rowspan="4">”</td><td rowspan="4">एचोऽयवायावः(४)</td></tr>
<tr><td>ओ</td><td>अव्</td></tr>
<tr><td>ऐ</td><td>आय्</td><td rowspan="2">वान्तः</td></tr>
<tr><td>औ</td><td>आव्</td></tr>
</table>

अथोक्तानां चतुर्णामपि सामान्यविधीनां यथायथमपवादा उच्यन्ते —

**५०। एत्येधत्यूठ्सु। (६-१-८९)**

यथा अकारः, ककारः इत्यादिवद्वर्णाः ‘कार’-प्रत्ययेन निर्दिश्यन्ते, तथा भवतिः, एधतिरित्येवं तिप्रत्ययेन धातवो[9] निर्दिश्यन्ते। अतः सूत्रे एत्येधतिभ्याम् ‘इ’ ‘एध’ इत्येतौ धातू ग्राह्यौ। । 'वृद्धिरेचि’ इति पूर्वसूत्रं समग्रमनुवर्तते। ‘आत्’ इति च ‘आद् गुणः’ इत्यतोऽनिषज्यते। एचीत्येतत् ‘एत्येधत्यूठ्सु’ इत्यस्य विशेषणं सत् ‘एजादौ’ इत्यर्थं बोधयति। तत्र ‘ऊठ्’ इत्यस्यासंभवात् एजादित्वविशेषणं न संबध्यते। एच्प्रत्याहारेऽपि एकार एव संभवति। एवं च अवर्णादेकाराद्योः ‘इ’-’एध’-धात्वोः परयोः ऊठि वा परे वृद्धिरेकादेश इति सूत्रार्थः। एत्येधत्योः पूर्वसूत्रेणैव सिद्धे ‘एङि पररूपम्’ इति वक्ष्यमाणमपवादं बाधितुमिदं वृद्धिविधानम्। ऊठस्तु आद्गुणं बाधितुम्। ऊठः स्वरूपं तद्विधौ स्पष्टीभविष्यति। अथोदाह्रियते —

उप + एति = उपैति। उप + एधते = उपैधते।

प्रत्युदाहरणम् — एकारादिर्न चेत्, उप + इतः = उपेतः।

**५१। [10]उपसर्गादृति धतौ। (६-१-९१)**

अवर्णान्तादुपसर्गादृकारादौ धातै परे वृद्धिरेकादेशः आद्गुण- स्यायमपवादः। यथा — प्र + ऋच्छति = प्रार्च्छति। अ + ऋ इत्यस्य ‘आर्’ वृद्धिः।

**५२। एङि पररूपम्। (६-१--९४)**

अवर्णान्तादुपसर्गात् एङादौ धातौ परे परस्य रूपं (प्रकृते एङ्) एकादेशः स्यात्। पूर्वस्य लोप इति फलितम्। यथा —

प्र + एजते = प्रेजते। प्र + ओषति = प्रोषति।

---

[9] धातुलक्षणम् (१२५) सूत्रे दृश्यताम्।

[10] उपसर्गः (१३३) सूत्रे लक्षितः।

'वृद्धिरेचि' इत्यस्यायमपवादः। अस्यापवादः 'एत्येधत्यूठ्सु' इति। अपवादस्यापवादनात् प्रत्यावृत्त उत्सर्गः प्रतिप्रसव इत्युच्यते। तस्मात् उपैतीत्यादौ वृद्धेः प्रतिप्रसवः। अत्र वार्त्तिकम् —

**॥*॥ओत्वोष्ठयोः समासे वा ॥**

अवर्णादोत्वोष्ठयोः एङि परे पररूपं विकल्पेन स्यात्। तच्च समास एव। यथा — स्थूल+ओतुः = स्थूलोतुः, स्थूलौतुः। बिम्ब+ओष्ठः = बिम्बोष्ठः, बिम्बौष्ठः। प्रत्युदाहरणम् — (समासाभावे तु) तव + ओष्ठः = तवौष्ठः।

**५३। ओमाङोश्च। (६-१-९५)**

अवर्णात् ओमिति प्रणवे आङ् इतुपसर्गे च परे पररूपमेकादेशः स्यात्। आङो ङकार इत्। यथा —

शिवाय + ओम् नमः = शिवायों नमः।

अद्य + ओढा (आ+ऊढा=ओढा) अद्योढा। 'वृद्धिरेचि' इत्यापवादः।

शिव + एहि (आ+इहि= एहि) शिवेहि। 'एत्येधत्यूठ्सु' इत्यस्यापवादः।

**५४। अकः सवर्णे दीर्घः। (६-१-९६)**

अकः सवर्णे परे दीर्घ इति यण्गुणयोरपवादः। अतः 'इको यणचि' 'आद्गुणः' इत्युभयोरपि सूत्रयोः असवर्णोऽजेव विषयः। अकः सवर्णोऽच् अगेव ह्रस्वसदीर्घादिभेदभिन्नः। अकोऽकि परे स्ववर्णदीर्घ इति फलितम्। अथोदाह्रियते —

मुर + अरिः = मुरारिः। अधि + ईशः = अधीशः।

गुण + आढ्यः = गुणाढ्यः। यदु + उद्वहः = यदूद्वहः।

दया + अब्धिः = दयाब्धिः। पातृ+ऋषभः = पातृषभः।

रमा + आलिङ्गितः = रमालिङ्गितः।

**५५। एङः पदान्तादति (पूवः)। (६-१-१०९)**

पूर्वः पूर्वरूपम्। पदान्तादेङः अति (ह्रस्वे अकारे) परे पूर्वरूपं (=एङ्) एकादेशः स्यात्। अयमेकः पदान्तसंधिः। अन्ये तु वेशेषकथनाभावादुभयसंधयः। यथा —

हरे + अव = हरेव। विष्णो + अव=विष्णोव। अत्र स्थितः अकारः पूर्वरूपेण लुप्त इति द्योतयितुं ऽ इति प्रश्लेषाख्यं चिह्नं निवेश्यते। यथा — हरेऽव, विष्णोऽव। इदं सूत्रम् 'एचोऽयवायावः' इत्यस्यापवादः।

अथ संधिनिषेधः — योऽयं प्रकृतिभाव इति व्यपदिश्यते ; संधौ ह्यकृते पदं प्रकृत्या (यथास्थितरूपेण) एवावतिष्ठते॥

**५६। प्लुतप्रगृह्या अचि नित्यम् (प्रकृत्या)। (६-१-१२५)**

प्लुताश्च प्रगृह्यासंज्ञाश्च अचि परे प्रकृत्या स्युः। संधिं न लभेरन्नित्यर्थः। विकल्पानिवृत्तिनिवृत्त्यर्थं नित्यमिति। प्लुतस्तावद्दूरादाह्वानादौ भवति। स लौकिक्संस्कृते नातीवोपयुज्यत इति तद्विधिनात्र व्याख्यायते। प्रगृह्यसंज्ञा परं विव्रियते — सा च प्रधमाध्यायप्रथमपादे विहिता॥

**५७। ईदूदेद्द्विवचनं प्रगृह्यम्। (१-१-११)**

ईदन्तम्, ऊदन्तम्, एदन्तं च द्विवचनं प्रगृह्यसंज्ञं स्यात्। अथोदाहरणम् — प्रथमं प्लुतस्य —

एहि कृष्ण ३ अत्र गौश्चरति। कृष्णात्रेति दीर्घो न। अनन्तरं प्रगृह्यस्य — कवी एतौ — कव्येतौ इति यण् न। पटू इमौ — पट्विमौ इति यण् न्। द्वे अङ्गे — द्वेऽङ्गे इति पूर्वरूपं न। आसाते इमौ — आसातयिमौ इति अयादेशो न।

**५८। अदसो मात्। (१-१-१२)**

अदसशब्दस्य मकारात् परौ ईदूतौ प्रगृह्ये स्तः। असंभवादेदित्यंशो न संबध्यते। अद्विवचनार्थम् अनीदूदेदन्तार्थं च वचनम्। अमू (पुंसि) आसाते। मुत्वस्यासिद्धत्वेनाप्राप्तावारम्भः। असिद्धत्वमुपरिष्टात् स्पष्टीफविष्यति। यथा —

अमी ईशाः — अमीशा इति सवर्णदीर्घो न।

**५९। ओत् (निपातः)। (१-१-१५)**

ओदन्तो निपातः प्रगृह्यं स्यात्। यथा —

अहो आश्चर्यं — अहवाश्चर्यमिति अवादेशो न। अथो आरभ्यते — अथवारभ्यते इति न।

अन्यत्रापि प्रगृह्यसंज्ञोक्ता नातीवोपयुज्यते। प्रसङ्गवशात् प्रगृह्यसंज्ञाविध्यर्थं प्रथमाध्यायसूत्राणि व्याख्याय प्रकृतः षष्ठाध्यायप्रथमपाद एवानुबध्यते —

**६०। ऋत्यकः (प्रकृत्या वा पदान्ते)। (६-१-१२८)**

ह्रस्वे ऋकारे परे पदान्तस्थः अक् प्रकृत्या वा स्यात्। यथा —

देव + ऋषिः = देवऋषिः, देवर्षिः। दधि + ऋते = दधिऋते, दध्यृते,

विधिस्तावत्त्रिविधः नित्यो वैकल्पिको बहुलश्चेति। अवश्यं कर्तव्यो नित्यः। ; इच्छया कर्तुमकर्तुं वा शक्यो वैकल्पिकः ;

'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव' इत्यव्यवस्थितो बहुलः। वा, विभाषा, अन्यतरस्याम् इत्यव्ययत्रयं विकल्पं द्योतयति। ऋषीणां नामग्रहणेऽपि विकल्पः पर्यवस्यति। तेषां हि तुल्यं प्रामाण्यम्; तत्रैकस्य मतेऽस्ति अन्येषां मते नास्तीति च स्थितिर्विकल्प एव किल। विषयैकदेशे प्रवृत्तिरेकदेशेऽप्रवृत्तिरिति स्थितिश्च विकल्पस्यैव कोऽपि भेदः। सेयं व्यवस्थितविभाषेत्युच्यते॥

————————

**हल्संधिः।**

हल्संधिस्तावदसिद्धकाण्डे वर्तते। असिद्धकाण्डो नमाष्टाध्याय्याश्चरमा त्रिपादी (अष्टमस्याध्यायस्य द्वितीयतृतीयचतुर्थाः पादाः)। सपादैः सप्तभिरध्यायारुक्तेषु विधिषु कर्तव्येषु उत्तरा त्रिपादी असिद्धा (अविद्यमानप्राया)। त्रिपाद्यामपि पूर्वंपूर्वं विधिमपेक्ष्य परःपरो विधिरसिद्धः। सपादसप्ताध्याय्या कृत्स्नापि रूपनिष्पत्तिप्रक्रिया प्रतिपादिता ; त्रिपाद्यां तु यदुच्यते तत्केवलं निष्पन्नस्य पदस्य उच्चारसंस्करणम्। अतस्त्रिपादीचोदितो विधिरन्त एव प्रवर्तते। कृतेऽस्मिन् पुनः सपादसप्ताध्यायीविहितस्य विधेर्न प्रवृत्त्यवकाशः। सपादसप्ताध्यायी सिद्धा (=सर्वसंप्रतिपन्ना), त्रिपादी तु असिद्धा (=

असंप्रतिपन्ना सपादसप्ताध्याय्या)। प्रथमः सिद्धकाण्डः ; उत्तरोऽसिद्धकाण्डः। असिद्धकाण्डकार्यलक्षणं निमित्तमाश्रित्य सिद्धकाण्डगतो विधिर्न प्रवर्तयितव्य इति संकेतस्य तत्त्वम्। असिद्धकाण्डस्तावन्न केवलं सिद्धकाण्डं प्रत्यसिद्धः, किं तु तत्रापि पूर्वंपूर्वं प्रति परंपरं सूत्रमसिद्धमिति संकेतः। एवं च त्रिपाद्यां यत्र कुत्रापि स्थितं सूत्रं सपादसप्ताध्यायीं, त्रिपाद्यामेव सपूर्वसूत्रणि च प्रत्यसिद्धम् ; स्वोत्तरसूत्रणि तु प्रति सिद्धम्। अनया च रीत्या त्रिपाद्यां यथोयथोपचीयते सूत्रसंख्या तथा तथापचीयते सिद्धत्वं, एवमन्तिमं सूत्रं सर्वमेव सूत्रान्तरं प्रत्यसिद्धं भवति। व्याख्यातं चैतत् सूत्रम् — 'अ अ' (६) इति। अत एव विवृतस्य संवृतं केवलमुच्चारणमात्रकार्यमित्युक्तम्।

तदेतदसिद्धत्वविधायकं सूत्रं व्याख्यायते —

**६१। पूर्वत्रासिद्धम्। (८-२-१)**

इतः परं यदुच्यते तत् पूर्वोक्तं प्तत्यसिद्धम्। अष्टमाध्यायद्वितीयपादस्य प्रथममिदं सूत्रमिति सपादसप्ताध्यायीं प्रति उत्तरा त्रिपाद्यसिद्धा ; अधिकारसूत्रमिदमिति त्रिपाद्यामपि पूर्वं प्रति परं सूत्रमसिद्धम् ॥

असिद्धकाण्डे तावद्व्यञ्जनविकारा एवोच्यन्त इति विषयपर्यायालोचनेन यद्यपि सिद्धकाण्डादस्य व्यावर्तनं सुकरम्, तथाप्यसिद्धकाण्ड एवान्तरालिकस्यासिद्धत्वस्य विवेचने सूत्रानुक्रम एव यतः शरणीकरणीयो वर्तते, ततो लाघवार्थमसिद्धकाण्डगता विधय उद्देशानुक्रमेण पञ्चभिः कारिकाभिरत्र परिगणिताः —

नलोपोऽन्ते, मतोर्वत्वं, रो लः, संयोगतक्षणम्,।
चोः कु,-र्होढः, छशोःषत्वं, भष्भावोऽथ, पदान्तजश् ॥१॥
षढोः को, नश्च निष्ठायाः, क्विन् कु,-र्नो मान्तधातुषु,।
रुत्वं, वसुस्रंस्वादीनां दत्वं, र्वोपधदीर्घता, ॥२॥
मुत्वं, प्लुत,-छान्दसरु, ढ्रलोपो, रविसर्गता, ।
रोर्यः, शाकल्यलोपश्च, मो बिन्दु,-स्थुट् तुकौ, ङमुट् ॥३॥
सत्वेषत्वे विसर्गस्य, मूर्धन्यो, णत्वकीर्तनम्,।

श्चुत्वष्टुत्वे, पञ्चमत्वं, वर्णद्वित्वं च, जश्चरौ, ॥४॥

विन्दुत्वोः परसावर्ण्यं, हो घोषः, शश्छ इत्यमी।

हल्विकारास्त्रिपाद्युक्ता असिद्धाः स्युरनुक्रमात् ॥५॥

स्वरव्यञ्जनसंध्योः सिद्धासिद्धत्वकृतादन्योऽप्यस्ति भेदः। स्वरसंधिमेव पाणिनिः संधित्वेन गणयति, यतः स एव **'संहितायाम्'** (६-१-७२) इतधिकृत्य विहितः। व्यञ्जन-[11] संधिस्तु 'पदस्य' (८-१-१६) इत्यधिकृत्यारब्धो झलि परेऽपि क्वचित् क्वचिद्विधीयत इत्येव। अतः पदान्ते झलि परे वा विहितानि, वर्णानां योगमात्रे चोदितानि च कार्याण्यस्मिन् प्रकरणे यावच्छक्यं सूत्रानुक्रमेण कथ्यन्ते॥

### ६२। चो कुः (झलि पदान्ते च)। (८-२-३०)

चवर्गस्य कवर्ग आदेशः स्यात् झलि परे पदान्ते च। यथा —

| **पदान्ते** | **झलि परे** |
|---|---|
| वाच् = वाक् | सिच् + तं = सिक्तम्। |
| प्राच् = प्राक् | मुच् + तं = मुक्तम्। |
| स्रज् = स्रग् | भज् + तं = भक्तम्। |
| भिषज् = भिषग्। | तिज् + तं = तिक्तम्। |

### ६३। हो ढः। (८-२-३१)

झलि परे पदान्ते च हस्य ढ आदेशः स्यात्। यथा —

| **पदान्ते** | **झलि परे** |
|---|---|
| लिह् = लिढ् (=लिड्)। | लिह् + तं = लिढ् तं (=लीढम्)। |
| वाह् = वाढ् (=वाड्)। | वह् + तं = वढ् तं (=ऊढम्)। |

[11] अष्टमे २-३-४ पादेषु व्यञ्जनकार्याणि प्लुतश्च विधीयन्ते। तत्र २-यपादे पदान्ते, झलि परे च कार्याणि प्लुतश्च संहिताधिकारं विनैवानुशिष्यन्ते। ३-य ४-र्थ पादयोः 'तयोर्य्वावचि **संहितायाम्**' इत्यधिकरोत्याचार्यः। ततश्च द्वितीयपादकार्याणां नित्यत्वम्, अन्तिमपादयोस्तु कार्याणां संहिताविवक्षाविवक्षाभ्यामैच्छिकत्वं च फलति। त्रिपादीप्रथमपादविहितानां हल्कार्याणां निर्णये, पदान्ते झलि च हलानामेव संभव इति ज्ञानं सुलभम्। तेन च संधिकार्याणि मुष्टिग्राह्याणि भवन्ति। यथा —

पदान्ते — (१) हस्य ढः, (२) मध्यमेषु यवलान्ता अप्रसिद्धाः, (३) चो कुः, (४) झयां षस्य च जश्, (५) शस्य ष, (६) सस्य रुः। एवं व्यपकलिते र, ग, ङ, ड, ण, द, न, ब, म इति नवैव। एवमन्यदप्यूह्यम्।

पदान्ते झशि परे च खरातिखरघोषाणां मृदुरादेशोऽनुपदमेव विधास्यते। अतो लिढ् = लिड् ; लिढ्भिः = लिड्भिः। अन्येष्वप्युदाहरणेषु मृद्वादेशोऽयं द्रष्टव्यः॥

**६४। दादेर्धातोर्घः। (८-२-३२)**

दकारादेस्तु धातोर्हकारस्य झलि परे पदान्ते च ढस्यापवादो घः। यथा —

दह् = दघ् (=दग्)। दह् + भिः = दघ् + भिः (=धग्भीः)।

'धग्' इति रूपनिष्पत्तिरनुपदं वक्ष्यते।

**६५। वा द्रुहमुहष्णुहष्णिहाम्। (८-२-३३)**

द्रुहादीनां धातूनां हकारस्य वा घः, पक्षे ढः। यथा —

| **पदान्ते** | **झलि परे** |
|---|---|
| द्रुह् = द्रुघ्, द्रुढ् (=ध्रुक्, ध्रुट्) | मुह् + तः = मुघ् तः (=मुग्धः), मुढ् तः (=मूढः)। |

**६६। नहो धः। (८-२-३४)**

नहधतोर्हकारस्य तूक्ते निमित्ते धकार इति विशेषविधिः। यथा —

| **पदान्ते** | **झलि परे** |
|---|---|
| उपानह् = उपानघ् (=उपानद्)। | उपानह्+तं=उपानध्+तं (=उपानद्धम्)। |

**६७। व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः। (८-२-३६)**

'हो ढः' इतिवत् छशोः षः इति नवो विधिः। 'नहो धः' इतिवत् व्रश्चादिसप्तकस्य चवर्गान्तत्वेऽपि न कुः, अपि तु ष इति 'चोः कुः' (६२) इत्यस्यापवादोऽपि सूत्रेऽस्मिन् मिश्रीकृत्योच्यते। (१) 'छशोः षः' (२) 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजां च' इति यद्याचार्यो विभज्य सूत्रमकरिष्यत्तर्हि स्पष्टतरमभविष्यत्। झलि पदान्ते च छकारशकारयोः ष आदेशः, व्रश्चादीनां च कुत्वापवादः षः इत्यर्थः। यथा —

| पदान्ते | झलि परे |
|---|---|
| छान्तस्य - प्राच् = प्राष् (=प्राड्) | प्रछ् + तम् = प्रष् त (पृष्टम्)। |
| शान्तस्य - नश् = नष् (=नड्) | नश् + तम् = नष् तं (नष्टम्)। |
| व्रश्चादेः - सृज् = सृष् (=सृड्) | सृज् + तम् = सृष् तं (सृष्टम्)। |

**६८। एकाशो बशो भष् झषन्तस्य स्ध्वोः। (८-२-३७)**

धातोरित्यनुवर्तते ; एकः अच् यस्मिन् स वर्णराशिरेकाच् इति, सूत्रेषु प्राय एकाच्शब्दो बहुव्रीहिः। धातोरवयवभूतस्य झषन्तस्य च एकाचो वर्णराशेः संबन्धी यो बश् तस्य भष् आदेशः पदान्ते, सकारध्वप्रत्यययोश्च परयोः। झष इति घोषाणां प्रत्याहारः ; भष् इति बश इति च चवर्गवर्जं घोषमृद्वोः। यथा —

**पदान्ते** — दह् (६४) = दघ् = धघ् (=धग्)

गोदुह् ( ” ) = गोदुघ् = गोधुघ् (=गोधुग्)

मित्रद्रुह्( ” ) = मित्रद्रुघ् = मित्रध्रुघ् (= मित्रध्रुड्)

मित्रद्रुह्( ६५ ) = मित्रद्रुघ् = मित्रध्रुघ् (= मित्रध्रुड्)

**सकारे** — दह् + स्यात् = धक्ष्यति।

**ध्वप्रत्यये** — अबुध् + ध्वम् = अभुद्ध्वम्.

**६९। झलां जशोऽन्ते। (८-२-३९)**

पदान्ते झलां जश आदेशाः स्युः। झलिति पञ्चमवर्जं वर्ग्याणां ऊष्मणां च प्रत्याहारः। जशिति मृदूनां (वर्गतृतीयानां)। तत्रान्तरतम्यपरीक्षायां वर्गान्तानां स्वस्ववर्गीयो मृदुरादेशः। ऊष्मणां तु मध्ये ‘...छशां षः’ (६७), ‘हो ढः’ (६३), ‘ससजुषो रुः’ (७०) इति शहसानां तत्तद्विशेषविधानात् षकार एक एवावशिष्यते। तस्य ‘ऋटुरषाणां मूर्धा’ इति मूर्धस्थान्साम्यात् टवर्गमृदुः डकार आदेशो भवति।

यथा —

| | |
|---|---|
| वाक् = वाग् | चित् = चिद्। |
| गोधुघ् = गोधुग् | ककुभ् = ककुब्। |
| मित्रध्रुढ् = मित्रध्रुड् | द्विष् = द्विड्। |

अवसाने झलां विकल्पेन चर्त्वं (मृदूनां खरादेशं) वक्ष्यति ; अतः गोधुक्, ककुप् इत्यादिरूपाण्यपि भवन्ति। वाक्यमध्ये तु गोधुगयम्, ककुब्विभाग इत्यादि जश्त्वमेव॥

**७०। ससजुषो रुः। (८-२-६६)**

पदान्तस्य सकारस्य सजुष् इति शब्दस्य च रुः स्यात्। 'अलोऽन्त्य' - परिभाषया (३१) सजुष्शब्दान्त्यवर्णस्य षकारस्यादेशः। अयं शब्दः छन्दस्येव बहुशो दृश्यते। 'रु' इत्यादेशे उकारस्यानुनासिकत्वप्रतिज्ञानादेत्संज्ञायां लोपे 'र्' इत्येवादेशस्वरूपम्। रेफस्यास्य पुनरपि उत्वयत्वयोरादेशान्तरयोर्विधानार्थं उकारानुबन्धयोजनम्। उत्वेयत्वे सकारादेशभूतस्य रेफस्यैव विवक्षिते ; तथा च नैसर्गिकरेफात् सकारादेशरेफस्य भेदप्रदर्शनाय पूर्वो र इति, उत्तरो रुः इति च व्यपदिश्यते। यथा —

ज्योतिस् + इदं = ज्योतिरिदम्। दोस् + दण्डः = दोर्दण्डः।

धनुस् + आनय = धनुरानय। उच्चैस् + वृक्षः = उच्चैर्वृक्षः।

अवसाने रेफस्य विसर्गविधानात् (८२) ज्योतिः, धनुः, दोः, उच्चैः, इति रूपाणि स्युः। रोर्निमित्तभेदेन यकार उकारश्चादेशौ वक्ष्यते॥

**७०। ससजुषो रुः। (८-२-६८)**

**७२। रोऽसुपि। (८-२-६९)**

'अहन्' इत्यस्य पदस्य रुः स्यात् ; सुप्-प्रत्ययभिन्ने तु परे रोरपवादो रः। तथा च 'अहन्' इति पदस्य सुपि परे रुः ; अन्यत्र र इति फलितम्। सुप् इति २१ विभक्तिप्रत्ययानां (प्रथमादीनां) प्रत्याहारः। तेषां मध्ये हलादिषु प्रत्ययेषु परेषु पूर्वस्याः प्रकृतेः प्रत्ययान्तस्य च पदसंज्ञा वक्ष्यते। यथा —

अहन् + भिः = अहर् भिः (अहोभिः) — रुः।

अहन् + गणः = अहर्गणः — रः ।

रुरेफस्य उत्वविधानात् (९०) अहोभिरिति रूपम् ; रस्य तदभावाद् अहर्गण इति रेफस्यैव श्रवणम्। अत एव रोरपवादो रो विधीयते॥

**॥*॥ अहन्नित्यस्य रेफे परेऽपि रुः ॥** यथा —

अहन् + रम्यं = अहर् रम्यं (अहो रम्यम्)।

**७३। वसुस्रंसुध्वंस्वनडुहां दः। (८-२-७२)**

वस् प्रस्ययः ; स्रंस्, ध्वंस् इति धातू ; (एषु उकार इत्) अनडुह् इति नामशब्दः। पदस्यैत्यनुवर्तते। एषां पदान्ते दः स्यात् इत्यर्थः, विद्वस्, निषेदिवस्, उपेयिवस् इत्यादयो वस्प्रत्ययान्ताः। यथा —

विद्वस् + भिः = विद्वद्भिः। स्रस् = स्रद्।

अनडुह् + भिः = अनडुद्भिः।                    ध्वस् = ध्वद्।

अथ 'तिप्यनस्तेः' (८-२-७३) इत्यादिभिः त्रिभिः सूत्रैः तिङ्प्रत्ययेष्वपि दरू विधीयते। प्रक्रियाबाहुल्यात् तानि नात्र व्याख्यायन्ते। ततः 'र्वोरुपधाया...' (८-२-७६) इत्यादि दीर्घविधिनिषेधौ, अदसो मुत्वविधिश्च हल्संधावप्रकृतत्वात् प्रकरणान्तरेषु व्याख्यास्यन्ते। पश्चात् प्लुतविधिर्भाषायामनुपयुक्त इत्युपेक्ष्यते॥

'ससजुषो रुः' (७०) इति रुविधिरुक्तः ; अन्यदप्यस्ति रुविधानम् — 'मतुवसो रु संबुद्धौ छन्दसि' (८-३-१) इति। तत्र प्रथमो रुः इति पुल्लिङ्गः, छान्दसलौकिकभाषासाधारणश्च ; द्वितीयो रु इति नपुंसकं लौकिकभाषायां विरलप्रयोगं च इति भेदः। एवं च पदान्तरेफास्त्रिविधाः — रुः, रु, र इति। तत्र वक्ष्यमाणयोः उत्वयत्वयोः स्थानिनौ रु, रुश्च ; पूर्वस्वरस्यानुनासिकत्वं अनुस्वारासज्जनं वा कर्तुं निमित्तभूतं रु एव ; रस्तु रेफसामान्यं न कस्यापि विशेषविधेर्विषयः॥

**७४। मतुवसो रु संबुद्धौ छन्दसि। (८-३-१)**

अथ रुणः संनियोगेन (साहचर्येण) विशेषकार्यमुपदिशति।

**७५। अत्रानुनासिकः पूर्वस्य तु वा। (८-३-२)**

तुकारो भिन्नक्रमः अनुनासिकस्तु वा इति। रु नित्यं भवति; अनुनासिकस्तु पूर्वस्य वैकल्पिक इति तुकारो भेदं द्योतयति। रुप्रकरणेऽत्र रुणः पूर्वस्य स्वरस्य विकल्पेनानुनासिकत्वं कार्यमित्यर्थः। अनुनासिको वेत्युक्तम् ; तदभावे किं कर्तव्यमित्या —

**७६। अनुनासिकात् परोऽनुस्वारः। (८-३-४)**

अनुनासिकात् इत्यस्य अनुनासिकस्थानिन इत्यर्थः। अनुनासिकस्थानिनः स्वरात् परमनुस्वारासज्जनं कार्यम्। अनुनासिकः पूर्वस्वरस्योक्तः ; अतो रुणः पूर्वस्य स्वरस्य पश्चादनुनासिकत्वाभावे अनुस्वारो योजनीय इति फलितम्। एवं च रुणि कृते पूर्वस्वरोऽनुस्वारोऽनुस्वारपरो वा कार्यः। द्वित्रा एवात्र भाषोपयुक्ता विधयः ; तत्राप्येक एव सामान्यविधिः॥

**७७। पुमः खय्यम्परे। (८-३-६)**

अम् परो यस्मात् इति बहुव्रीहिः ; अम् खय् इत्युभौ प्रत्याहारौ। पदान्ते पुंशब्दस्य रु अन्तादेशः खयि परे ; खयश्च अम् परोऽस्ति चेत्। 'समः ष् सुटि' (८-३-५) इति पूर्वसूत्रात् (प्रश्लिष्टं) सकारमनुवर्त्यं रुणः सकारादेशोऽप्यनेन विधीयते। रुश्रवणं तु 'हरिवो मेदिनं त्वा' इत्यादिषु च्छान्दसप्रयोगेष्वेव। अथोदाहरणम् —

पुम् + कोकिलः = पुर् कोकिलः = पुस्कोकिलः ;

(अनुनासिकानुस्वारविकल्पात्) = पुँस्कोकिलः, पुंस्कोकिलः।

पुम् + खरः = पुँस्खरः, पुंस्खरः। पुम् + फलं = पुँस्फलं, पुंस्फलम्।

पुम् + पुत्रः = पुँस्पुत्रः, पुंस्पुत्रः। पुम् + चलि = पुँस्चली ( = पुँश्चली),

पुंस्चली ( = पुंश्चली)।

प्रत्युदाहरणम् — खय् परो न चेत् — पुं + गवः = पुङ्गवः।

(खयोऽम् न परश्चेत्) पुं + प्रतिभा = पुंप्रतिभा।

संयोगान्तलोपाभावो रुविधानद्वारा विधीयते इति फलति। पुंस् इति सान्तो हि पुंशब्दः। संयोगान्तलोपः २५९ तमसूत्रेण विधीयते॥

७८। नश्छव्यप्रशान्। (८-३-७)

अम्परे छविपरे पदान्तस्य नस्य रु स्यात्, न तु प्रशान्शब्दनकारस्य। अत्रापि रुणः सादेशः। यथा —

महान् + तरुः = महास्तरुः , = महांस्तरुः, महाँस्तरुः।

छान्दसेऽस्मिन् रुप्रकरणे बाला माक्लिश्यन्त्विति भाषोपयुक्तयोः सूत्रयोर्विषयः कारिकया संगृह्यते॥

चटताच्छठथाच्च प्रागन्त्यो नो बिन्दुपूर्वसः।
अम्परादेव, पुंसश्च खरारिखरवर्णतः॥

च ट त छ ठ थ एभ्यो वर्णेभ्यः पूर्वं स्थितस्य पदान्तनकारस्य अनुस्वारपूर्वकः सकार आदेशः ; च-ट-तादिभ्यो वर्णेभ्यः अम्प्रत्याहारः परो भवितुमर्हति। एवं पुंशब्दमकारस्याप्यनुस्वारपूर्वकः सकारः[12], किं त्वत्र परे वर्णा न केवलं चटतछठथा अपि तु सर्वे खरातिखराः। यथा

---

[12] (१) समः सुटि, (२) पुमः खय्यम्परे, (३) नश्छव्यप्रशान्, (४) उभयथर्क्षु, (५) दीर्घादटि समानपादे, (६) नॄन् पे, (७) स्वतवान् पायौ, (८) कानाम्रेडिते। इत्यष्टसूत्रीविषयेऽनुनासिकानुस्वारौ विधीयेते। तत्रानुनासिको लौकिकभाषायां परिलुतः। रु विधाय तस्य सकारकरणापेक्षया साक्षात्सकारविधाने प्रक्रियालाघवं भवति। ५ ६ ७ सूत्रै रुविधान एवेष्टसिद्धिरिति रुप्रकरणमिदमिति प्रचीनानां व्याख्या। तन्मते ‘सकारं प्रश्लिष्य रुणः सविधानं’ क-ख-प-फेषु विसर्गादिभाधनार्थमावश्यकमेव। एवं सति समः स् सुटि इति द्विसकारं पठित्वा इदं सप्रकरणमित्येवास्तु। दीत्घादतीत्यस्य च्छान्दसत्वादसिद्धत्वाभावकल्पनया सकारस्य ससजुषोरिति रुरस्तु। ६ ७ सूत्रयोः ससजुषोरित्यनन्तरं पाठः क्रियताम्। एवं चेदनुस्वारासिद्धिरिति तु नापाद्यम्। विसर्गोपध्मानीययोः प्रागनुस्वारस्य दुरुच्चरत्वात् इति स्वतन्त्रं प्रस्थानमाश्रीयते।

महान् + तरुः = महांस्तरुः।

कस्मिन् + चित् = कस्मिंस् चित् (= कस्मिंश्चित्)।

तस्मिन् + टिका = तस्मिंस् टीका (= तस्मिंष्टीका)।

वृक्षान् + छिनत्ति = वृक्षांस्छिनत्ति = (वृक्षांश्छिनत्ति)।

पुम् + कोकिलः = पुंस्कोकिलः पुम् + पुत्रः = पुंस्पुत्रः।

पुम् + चलि = पुंस्चली (=पुंश्चली) पुम् + खरः = पुंस्खरः।

**७९। ढो ढे लोपः। (८-३-१३)**

ढस्य ढे परे लोपः स्यात्। ढान्तस्य पदस्याभावात् पदमध्य एवायं भवति। अत इदमुपरिष्टादुदाहरिष्यामः॥

**८०। रो रि। (८-३-१४)**

रेफस्य रेफे परे लोपः स्यात्। ढरेफयोर्लोपे कार्यान्तरं षष्ठाध्याये विधीयते —

**८१। ढ्रलोपे पूर्वस्य दीर्घोऽणः। (६-३-१११)**

ढकाररेफयोर्लोपे लुप्ताभ्यां ताभ्यां पूर्वस्य अणो दीर्घः स्यात्। यथा —

स्वर् + राज्यं = (८०) स्व राज्यं, (८१) स्वाराज्यम्।
निर् + रागः = (८०) नि रागः, (८१) नीरागः।
दुर् + रक्तं =- (८०) दु रक्तम्, (८१) दूरक्तम्।
वपुस् + रम्यं = (७०) वपुर् रम्यम्, (८०) वपु रम्यम्, (८१) वपूरम्यम्।

**८२। खरवसानयोर्विसर्जनीयः (रः)। (८-३-१५)**

खरि परे अवसाने च रेफस्य विसर्गः स्यात्। यथा —

| **अवसाने** | **खरि** |
|---|---|
| पुनर् = पुनः। | पुनर् + करोति = पुनःकरोति। |
| पितुर् = पितुः। | पितुर् + प्रेम् = पितुःप्रेम। |
| दोस् = (७०) दोर् = दोः। | दोर् + फलं = दोःफलम्। |
| उच्चैस् = (७०) उच्चैर् = उच्चैः। | उच्चैर् + खण्डः = उच्चैःखण्डः। |
| अन्तर् = अन्तः। | अन्तः + सारम् =अन्तःसारम्। |

यद्यपि खर्प्रत्याहारे सर्वेऽपि खरातिखरा अन्तर्भूतास्तथापि ‘विसर्जनीयस्य सः’ (९४) इत्यादेशान्तरविधानात् कपवर्गीयणामेवायं विधिः फलति॥

'रो रि' 'खरवसानयोर्विसर्जनीयः' इत्येताभ्यां सूत्राभ्यां रेफसामान्यस्य कार्यमुक्तम् ; अथ 'रु' इति कृत्रिमस्य रेफस्य कार्याण्याह —

### ८३। रोः[13] सुपि। (८-३-१६)

सुप् सप्तमीबहुवचनप्रत्ययः। तस्मिन् परे रोरेव विसर्गो न तु नैसर्गिकरेफस्य। 'खरव...' (८२) इति रेफसामान्यस्य प्राप्तो विसर्ग एव नियम्यते। यथा —

पयस् + सु = पयर् सु = पयःसु। दोस् + सु = दोर् सु = दोःसु।

विसर्गस्य पुनर्विकल्पेन सत्वं विधास्यते ; अतः 'पयस्सु' 'दोस्सु' इत्यपि रूपं साधु। प्रत्युधाहरण —

(नैसर्गिगरेफस्य तु) गीर् + सु = गीर्सु (= गीर्षु)।

### ८४। भोभगोअघोअपूर्वस्य योऽशि (८-३-१७)

भोस्, भगोस्, अघोस् इति सकारान्ता निपाताः ; अः = अवर्णः। एतत्पूर्वकस्य (एभ्यः परस्य) रोर्यकार आदेशः स्यात् अशि परे। अत्र 'अ-पूर्वस्य' इत्यंशः सामान्यविधिः ; भोस्प्रभृतीनां विशेषविधिरिति विषयविवेको बोद्धव्यः। यथा—

यशस् + उज्ज्वलम् = (७०) यशर् + उज्ज्वलम् = यशय् उज्ज्वलम्।
वेधास् + इह = (७०) वेधार् + इह = वेधाय् इह।
वेधास् + वन्द्यः = (७०) वेधार् + वन्द्यः = वेधाय् वन्द्यः।
भोस् + एहि = (७०) भोर् + एहि = भोय् एहि।
भोस् + गच्छ = (७०) भोर् + गच्छ = भोय् गच्छ।

यत्वयकारस्योच्चारणे पक्षभेदाः सन्ति ; तानाह —

### ८५। व्योर्लघुप्रयत्नतरः शाकटायनस्य। (८-३-१८)

व्योरिति वकारयकारयोः षष्ठीद्विवचम्। 'भो... अपूर्वस्य' इत्यनुवर्तते। 'पदस्य' इत्यधिकारोऽप्यस्ति। भोगभगॉघोपूर्वयोरवर्णपूर्वयोर्वा पदान्तयकारवकारयोर्लघुप्रयत्नतरौ यकारवकारौ स्यातामशिपरे। इदं च शाकटायनस्याचार्यस्य मतम्। उक्तविधौ यकारवकारौ यन्तं लघूकृत्य ध्वनिशैथिल्येनोच्चार्याावित्यर्थः॥

---

[13]सुप् इति सकारस्य खरि अन्तर्भूतत्वात् 'खरवसानयोः' इत्येव सिद्धे नवं विधिमारभमाण आचार्यः पिष्टमेव पिनष्टि। तच्च तस्मिन् न संभाव्यते। अतः कल्प्यते नियमार्थो विधिरिति। नियमस्वरूपं च सुप्सकारे भवति चेत् रोरेवेति। एवमन्यत्रापि सिद्धे पुनरारम्भो नियमे पर्यवस्यतीति बोध्यम्। मात्रालाभव्यसनात् 'रोरेव सुपि' इति न सूत्रितमाचार्येण।

**८६। पः शाकल्यस्य। (८-३-१९)**

उक्तविधयोर्यवयोः श्रवणमेव मास्त्विति शाकल्य आचार्यो मन्यते॥

**८७। ओतो गार्ग्यस्य। (८-३-२०)**

ओकारत् परयोरेव यवयोरुक्तनिमित्ते लोपमिच्छति गार्ग्य आचार्यः॥

**८८। हलि सर्वेषाम्। (८-३-२२)**

अचि परे एव पक्षभेदाः, हलि परे तु यवयोर्लोप एव सर्वाचार्यसंमतः। एतेन अचि परे यशयुज्ज्वलम्, यशयुँज्ज्वलम्, यश उज्ज्वलम् इति त्रीणि रूपाणि। हलि (हशेव संभवति) तु — वेधा वन्द्यः, भो गच्छ — इति लुप्तयकारमेव रूपम्॥

अत्रायमाचारः कविसंप्रदायात् — अवर्णपूर्वयोः पदान्तयोर्यवयोर्लघुप्रयत्नतरौ लोपो वा विधीयते ; अवर्णपूर्वौ यवौ च अय्, अव्, आय्, आव् इत्येवंसूपौ। चत्वार्यप्येतानि 'एचोऽयवायवः' (४४) इत्यनेन विधीयन्ते ; अय्, आय् इति यान्ते द्वे 'भोभ...अपूर्वस्य' (८४) इत्यनेन च। तत्र रोर्यत्वेन (८४) निष्पन्नोयकारः सर्वत्र लुप्यते, एच आदेशैः (४४) निष्पन्नेष्वपि एङादेशयोः अयवोर्यवौ लुप्येते, ऐजादेशयोरायावोस्तु अलघुनैव प्रयत्नेन उच्चार्येते इति। तथा हि —

| | |
|---|---|
| देवस् + इह = देव इह ८६ लोपः। | गुरो + इह = गुर इह ८६ लोपः। |
| देवास् + इह = देवा इह ८६ लोपः। | तस्मै + इह = तस्मायिह ८६ उच्चारणम् |
| देवे + इह = देव इह ८६ लोपः। | देवौ + इह = देवाविह ८६ उच्चारणम् |

रोर्यत्वं पदान्त एव ; एजादेश पदान्ते पदमध्ये च। तत्र पदमध्ये लोपस्य प्रसक्तिरेव नास्ति। अतः हरये, गुरवे, नायकः, पावकः, इत्येव रूपाणि। यवयोर्लोपस्य षष्टाध्यायविहितं स्वरसंधिं प्रत्यसिद्धत्वात् 'देव इह' इत्यादौ 'देवेह' इति आद्गुणादयो न भवन्तीति स्पष्टम्। स्वरसंधिविधायकानां षाष्ठाध्यायिकानां सूत्राणां दृष्ट्या नास्त्येव हि शाकललोपोऽसौ। अथ रोः 'उ' इति षष्ठाध्यायेऽपि अश्विदादेशो विधीयते। यथा—

**८९। अतो रोरप्लुतादप्लुते** (अति उत्)। **(६-१-११३)**

अप्रसिद्ध्या प्लुतस्यास्माभिरुपेक्षितत्वात् 'अप्लुतादप्लुते' [14] इति पदद्वयं विहायैव सूत्रार्थो व्याख्यायते। तथा च 'अतो रोरत्युत्' इत्येवानुवृत्त्युपस्कृतं सूत्रम्। अतः (ह्रस्वात्) अकारात् परस्य रोः उत् स्यात् अति परे। 'उत्' इत्यत्र तकार इत्संज्ञो लुप्यते। 'अतः' 'अति' इत्यनयोस्तु दीर्घनिवृत्त्यर्थं तपरकरणम्। यथा —

यशस् + अस्य = यशर् + अस्य = यश उ + अस्य = (आद्गुणेन)

यशो अस्य = (एङः पदान्तादतीति पूर्वरूपेण) यशोऽस्य[15]।

उत्वस्य सिद्धत्वात् गुणपूर्वरूपे भवतः। असिद्धकाण्डगतस्य रोर्वचनसामर्थ्यात् उत्वविधिमात्रे सिद्धत्वम्। प्रत्युदाहरणं —

(अतः परो न चेत्) वेधास् + असौ = वेधा असौ।

(अत् परो न चेत्) यशस् + आर्जय = यश आर्जय।

(रेफान्तं चेत्) प्रातर् + अत्र = प्रातरत्र।

**९०। हशि च। (६-१-११४)**

हशि परे च अतः परस्य रोः उः। यथा —

मनस् + हरम् = मनर् + हरम् = मन + उ हरम् = मनोहरम्।

देवस् + वन्द्यः = देवर् + वन्द्यः = देव + उ वन्द्यः = देवो वन्द्यः।

देवस् + नम्यः = देवर् + नम्यः = देव + उ नम्यः = देवो नम्यः।

उत्वविधिरयम् '... अपूर्वस्य योऽशि' (८४) इति यत्वस्यापवादः। तेन आतः परस्यैव रोः समग्रे अशि परे यत्वम् ; अतः परस्य तु अति हशि च परे उत्वम्, आति इचि चैव परे यत्वमिति विषयविवेकः। [ अश् — (अत् + हश्) = आत् + इच् ]

अथ प्रकृतोऽष्टमाध्याय एव व्याख्यायते —

---

[14] अप्लुतादतः परस्य रोः अप्लुते अति परे उः इत्यन्वयः। तपरकरणेनैव दीर्घवत् प्लुतस्यापि निवारणे सिद्धे अप्लुतविशेषणमुभयत्रापि किमर्थमिति चेत्, प्लुतविधिस्त्रिपादीगतः षाष्ठाध्यायिकस्य उत्वविधेरस्य दृष्ट्या असिद्ध इति निलीय स्थितस्यापि प्लुतस्य वारणार्थम्।

[15] अत्र पूर्वपक्षी प्रत्यवतिष्ठते — "ननु उकारस्य पूर्वेण अता प्रथमं गुणं कृत्वा ततः पूर्वरूपेण 'यशोऽस्य' इति रूपमुक्तम् ; (उकारस्य) परेण अता प्रथमं यणादेशं कृत्वा 'यशवस्य' इति रूपं कुतो नापद्यते?" इति। शब्दानां क्रमेणोच्चारणप्रसङ्ग एव कार्यसंभवेन पूर्वकार्यस्य ('अ + उ' इत्यस्य) निमित्तं प्रथममुपतिष्ठते। ततः परकार्यस्य ('उ + अ' इत्यस्य)। ततश्च पूर्वकार्यं संजातनिमित्तकमादौ प्रवर्तते। स्वप्रवृत्त्या चापहरत्येव परकार्यस्य निमित्तम्। एवमनिष्टरूपापत्तेरत्रावकाश एव नास्ति। इति युक्त्या प्रत्यवस्थाता प्रतिक्षेप्यः।

### ९१। मोऽनुस्वारः[16]। (८-३-२३)

पूर्वसूत्रात् 'हलि' इत्यनुवर्तते। पदान्तस्य मकारस्य हलि परेऽनुस्वारः। यथा—

इदम् + वनम् = इदं वनम्। किम् + हसति = किं हसति।

सायम् + संध्या = सायं संध्या सम् + रक्तम् = संरक्तम्।

**प्रत्यु०** — (अचि तु परे) इदम् + अरण्यम् = इदमरण्यम्।

### ९२। नश्चापदान्तस्य झलि। (८-३-२४)

अपदान्तस्य नस्य मस्य च झलि परेऽनुस्वारः। यथा —

पयान् + सि = पयांसि। आक्रम् + स्यते = आक्रंस्यते।

धनून् + षि = धनूंषि। अधिजिगाम् + सति = अधिजिगांसति।

**प्रत्यु०** — (पदान्तस्य तु) राजन् भुङ्क्ष्व। (झलोऽन्यस्मिन् परे) गम्यते, तन्यते।

### ९३। ङमो ह्रस्वादचि ङमुण्नित्यम्। (८-३-३२)

ङम् इति प्रत्याहारः, उट् इत्यागमचिह्नम्। द्वन्द्वान्ते श्रूयमाणं पदं यथा प्रत्येकमन्वेति तथा प्रत्याहारान्ते प्रयुक्तमागमचिह्नमपि एकैकेन वर्णेनान्वेति ; तथा च ङुट्, णुट्, नुट् इत्यागमाः। ह्रस्वात् परो यो ङम्, तदन्तात् पदात् परस्य अचो ङमुडागमः स्यात्। ङान्तात् ङुट्, णान्तात् णुट्, नान्तात् नुट् इति यथासंख्यमागमाः। आगमेषूकार इत् इति पूर्वमेवोक्तम्। टित्त्वादागम आदौ योजनीयः। (२५) । यथा —

प्रत्यङ् + आत्मा = प्रत्यङ् ङात्मा = प्रत्यङ्ङात्मा।

सुगण् + ईशः = सुगण् णीशः = सुगण्णीशः।

लिखन् + आस्ते = लुखन् नास्ते = लिखन्नास्ते।

**प्रत्यु०** — 'ह्रस्वात्' किं[17]? प्राङ् + आस्ते = प्राङास्ते।

भवान् + आस्ते = भवानास्ते।

---

[16] अस्यापवादः — **१। मो राजि समः क्वौ। (८-३-२५)।** क्विप्रत्ययान्ते राजतौ परे 'सम्' इतुपसर्गमकारस्य म एव न त्वनुस्वारः। 'क्वि' इति सर्वलोपी प्रत्ययः। तेन 'राज्' इत्येव क्विप्रत्ययान्तो राज्धातुः। उदा० सम् + राज् = सम्राज् = (६७) 'सम्राड्'। एकशब्दनिष्पत्त्यर्थकमिदं सूत्रमिति ग्रन्थशरीरे नोपात्तम्। अनन्तराश्च 'हे मपरे वा' इत्यादयो विधयो लौकिकसंस्कृतेऽनुपयुक्ता इत्युपेक्षिताः.

[17] 'ह्रस्वात्' इति पदं किमर्थम्? तस्य किं प्रयोजनमिति प्रश्नः। एवमपरेऽपि प्रतुदाहरणेषु 'किम्' इत्यस्य किंप्रयोजनमित्यर्थो बोध्यः।

१४। विसर्जनीयस्य सः। (८-३-३४)

इह 'हि' 'संहितायाम्' इत्यधिक्रियते। संहिता च विसर्जनीयस्य परेण वर्णेन संभवतीति नावसानेऽस्य प्रवृत्तिः। विसर्जनीयश्च खरसानयोर्विहितः। इत्थं च खरीत्यर्थात् सिध्यति। अपवादाभावे विसर्गस्य सकार आदेशः स्यात् खरि। अपवादा उत्तरसूत्रेषु वक्ष्यन्ते। यथा —

पुनर् + तत्र = पुनः + तत्र = पुनस्तत्र।
यशस् + तस्य = यशर् + तस्य = यशः + तस्य = यशस्तस्य।
पुनर् + च = पुनः + च = पुनस् + च = (पुनश्च)।
पुनर् + टीकते = पुनः + टीकते = पुनस् + टीकते = (पुनष्टीकते)।

**१५। शर्परे विसर्जनीयः। (८-३-३५)**

खरीत्यर्थात् सिध्यतीत्युक्तम्। शर् परो यस्मात् तादृशे खरि परे वेसर्गस्य विसर्ग एव, न कोऽपि विकारो भवतीत्यर्थः। अत उत्तरसूत्रे वक्ष्यमाणो जिह्वामूलीयोपध्मानीयविकल्पोऽपि न भवति। यथा —

शितः + क्षुरः = शितः क्षुरः। दृढः + त्सरुः = दृढः त्सरुः।
मृगः + प्साति = मृगः प्साति।

**१६। वा शरि। (८-३-६३)**

शरि परे विसर्गस्य विसर्ग एव वा स्यात्। यथा —

यशस् + शुभ्रं = यशर् + शुभ्रं = यशः शुभ्रं, यशस् शुभ्रं (=यशश्शुभ्रम्)।

यशस् + सितम् = यशर् + सितम् = यशः सितं, यशस्सितम्।

यशस् + षण्डः = यशर् + षण्डः = यशः षण्डः, यशस् षण्डः (=यशष्षण्डः)।

**१७। कुप्वोः ≍ क ≍ पौ च। (८-३-३७)**

कवर्गपवर्गयोः परयोर्विसर्गस्य क्रमात् जिह्वामूलीयोपध्मानीयौ स्याताम् ; चकारग्रहनात् विसर्गश्च। ≍ क इति जिह्वामूलीयस्य, ≍ प इति उपध्मानीयस्य च संकेतः॥

कस् + करोति = कर् + करोति = क ≍ करोति, कः करोति।
कस् + खनति = कर् + खनति = क ≍ खनति, कः खनति।
कस् + पचति = कर् + पचति = क ≍ करोति, कः पचति।
कस् + फलति = कर् + फलति = क ≍ फलति, कः फलति।

खरि पर एव विसर्गो विहितः ; खर् च खरातिखरान् प्रत्याहरति ; अतः 'कुप्वोः' इत्युक्तेऽपि कवर्गपवर्गान्तर्गतानां खरातिखराणामेव ग्रहणं संभवतीति बोध्यम्।

**९८। इसुसोः सामर्थ्ये** (विसर्जनीयस्य वा षः कुप्वोः)**। (८-३-४४)**

सामर्थ्यं एकवाक्यान्वयः। इस् उस् इत्येतयोर्विसर्गस्य कुप्वोः परयोर्वा षकार आदेश एकवाक्यतायाम्। यथा —

सर्पिः + करोति = सर्पिष्करोति, सर्पिःकरोति।

धनुः + प्राप्नोति = धनुष्प्राप्नोति, धनुःप्राप्नोतु।

**प्रत्यु०** — (सामर्थ्याभावे) तुष्ठतु सर्पिः, पिब त्वमुदकम्।

**९९। नित्यं समासेऽनुत्तरपदस्थस्य। (८-३-४५)**

समासविषयेऽनुत्तरपदस्थस्य इस्, उस् इत्याभ्यां निष्पन्नस्य विसर्गस्य कुप्वोः परयोः ष आदेशः। जिह्वामूलीयोपध्मानीययोरपवादोऽयं षः। यथा —

सर्पिः + कुण्डिका = सर्पिष्कुण्डिका — इस्।

धनुः + कपालं = धनुष्कपालं — उस्।

आयुः + फलं = आयुष्फलं — उस्।

ज्योतिः + खण्डः = ज्योतिष्खण्डः — इस्।

**१००। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य। (८-३-४६)**

अतः परस्य अनव्ययविसर्गस्य समासेऽनुत्तरपदस्थस्य नित्यं सकारादेशः कृकमि इति धात्वोः कंसादिशब्देषु च परेषु। यथा —

अयः + कारः = अयस्कारः। यशः + कामः = यशस्कामः। पयः+कुम्भः = पयस्कुम्भः — इत्यादि।

**१०१। कस्कादिषु च। (८-३-४८)**

कस्कादिगणपठितेषु शब्देषु च इणः परस्य विसर्गस्य षः, अन्यस्य तु सः। यथा —

सर्पिस् + कुण्डिका = सर्पिर् + कुण्डिका = सर्पिष्कुण्डिका।
कः + कः = कस्कः। कौतः + कुतः = कौतस्कुतः।

विसर्गस्य षसावादेशौ येष्वपेक्ष्येते ते शब्दाः कस्कादिषु पठिता बोध्याः। ईदृशो गण 'आकृतिगण' इत्युच्यते। इत ऊर्ध्वं सूत्रक्रमे मूर्धन्यादेशविधिः विनामविधिश्च[18] वर्तते। प्रकरणद्वयं तत्, तयोः प्रसङ्गे व्याख्यास्यामः।

### १०२। स्तोः श्चुना श्चुः। (८-४-४०)

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गावादेशौ स्याताम्। अत्रोत्तरसूत्रे च स्थान्यादेशयोरेव यथासंख्यं विवक्षितम्, न तु योगस्य। तेन आदेशाः — सकारस्य शकारः, तकारस्य चकारः, दकारस्य जकारः, नकारस्य ञकारः इत्याद्येव। योगस्तु यथासंभवं सर्वोऽपि। यथा —

| | |
|---|---|
| पयस् + शीतं = पयश्शीतम्। | राजन् + जय = राजञ्जय। |
| तपस् + चिनोति = तपश्चिनोति। | वृक्षस् + छिद्यते = वृक्षश्छिद्यते। |
| सत् + चित् = सच्चित्। | तद् + ज्ञानं = तज्ज्ञानम्। |
| परिषद् + जनः = परिषज्जनः | यज् + न = यज्ञः। |

### १०३। ष्टुना ष्टुः। (८-४-४१)

सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गादेशौ स्याताम्। यथा —

| | |
|---|---|
| महस्+षण्डः = महष्षण्डः। | महान् + ढौकते = महाण्डौकते। |
| रामस् + टीकते = रामष्टीकते। | पिष् + तं = पिष्टम्। |
| उत् +टङ्कनं = उट्टङ्कनम्। | तद् + डिण्डिमं = तड्डिण्डिमम्। |

अत्र श्चुत्वयोः 'पयश्शीतं' 'महष्षण्डं' इत्यादिषु पदान्तसकारोदाहरणेषु प्रथमं 'ससजुषो रुः' (७०) इति रुत्वं, ततो रोः 'खरवसानयो......' (८२) इति विसर्गः, अनन्तरं विसर्गस्य 'विसर्जनीयस्य सः' (९४) इति पुनस्सकारः। तस्यैव स्चुत्वष्टुत्वे भवत इति प्रक्रिकाक्रमो ज्ञेयः। तत्तन्न्यायसञ्चारणार्थकश्चायमायासः।

अथ श्चुत्वष्टुत्वे निषेधति —

### १०४। न पदान्ताट्टोरनाम्। (८-४-४२)

पदान्तात् टवर्गात् परस्य स्तोः ष्टुत्वं न स्यात्, 'नाम्' इति षष्ठीबहुवचनं वर्जयित्वा। यथा

---

[18] विनामो नाम नकारस्य णकारादेशः, णत्वमिति पाणिनीयैर्व्यवहृतः।

(षष् + सन्तः) = षट् + सन्तः = षट्सन्तः। षत् + तरवः = षट्तरवः।

सम्राड् + दयते = सम्राड्दयते।

**प्रत्यु०** — (पदान्तात् किम्?) ईड् + ते = ईट्टे।

**॥*॥ अनाम्नवतिनगरीणामिति वक्तव्यम् ॥**

'नाम्' एक एव सूत्रकारेण वर्जितः। नवतिनगरीशब्दावपि वर्ज्यावित्याह चार्त्तिककारः। षष् इति षान्तः शब्दो (६९) जश्त्वेन षड् इति डान्तो भवति। तथा सिथिते प्रकृतसूत्रस्य प्रवृत्तिः। यथा —

षड् + नां (६९) = षड् + णां (= षण्णाम्)। (१०७)
षड् + नवतिः = षड् + णवतिः (=षण्णवतिः)। (१०७)
षड् + नगरी = षड् + णगरी = (षण्णगरी)। (१०७)

## १०५। तोः षि। (१-४-४३)

तवर्गस्य षकारे परे ष्टुत्वं न भवति। यथा —

सत् + षण्डः = सत्षण्डः।    महान् + षण्डः = महान् षण्डः।

### १०६। शात्। (८-४-४४)

शकारात् परस्तवर्गः प्राप्तं कार्यं (स्चुत्वं) न स्यात्। यथा —

विश् + नः = विश्नः

शकारात् परस्तवर्गः पदमध्य एव भवति। 'न पदान्ताट्टोः' इति पदान्ते ष्टुत्वं च निषिद्धम्। अतो ज्ञापकादेव श्चुत्वष्टुत्वे पदमध्येऽपि भवतः।

## १०७। यरोऽनुनासिकेऽनुनासिको वा। (८-४-४५)

पदान्तस्य यरः अनुनासिके परे अनुनासिकादेशो वा स्यात्। यर्प्रत्याहारो हकारभिन्ननि व्यञ्जनानि क्रोडीकरोति। तत्र वर्ग्याणाः स्वस्वपञ्चम एवानुनासिकः। यवलानां स्वं स्वं अनुनासिकरूपम्। रेफस्य परमनिनासिकादेशो न भवत्येव। यथा —

वाग् + माधुर्यं = वाङ्माधुर्यं, वाग्माधुर्यम्।
चित् + मयं = चिन्मयम्।    अप् + मयं = अम्मयम्।

**॥*॥ प्रत्यये भषायां नित्यम्॥**

वैकल्पिकोऽयमनुनासिकादेशः प्रत्ययस्थेऽनुनासिके परे भाषायां नित्यं भवति। अत एव 'चिन्मयम्' 'अम्मयम्' इत्युदाहरणयोर्विकल्पो न दर्शितः। हलादौ विभक्तिप्रत्यये तद्धिते च परे प्रकृतेरपि पदसंज्ञास्तीति पूर्वमेवोक्तम्, अतोऽस्त्येव पदान्तत्वमपि।

### १०८। अचो रहाभ्यां द्वें। (८-४-४६)

यर इत्यनुवर्तते ; अचः परौ यौ रेफहकारौ ताभ्यां परस्य यरो द्वे स्याताम्। द्वे द्विरुच्चारणं (द्वित्वं)। यथा —

अर्कः = अर्क्कः, ब्रह्मा = ब्रह्म्मा।

### १०९। अनचि च। (८-४-४७)

अचः परस्य यरो द्वे स्याताम्, न त्वचि। यथा —

सुध्युक्तः = सुध्-ध्युक्तः = (सुद्ध्युक्तः)। पित्र्युक्तः = पित्त्र्युक्तः।
मध्वरिः = मध्-ध्वरिः = (मद्ध्वरिः)। गम्लाह = गम्म्लाह।

सूत्रेणानेन अचः परस्य यरोऽच्परत्वाभावे द्वेत्वं विधीयते। एवं च अवाक्यादौ[19] संयोगप्रथमवर्णस्य द्वित्वमिति फलितम्। संयोगः पुनर्यदि रेफादिर्हकारदिर्वा भवति तर्हि द्वितीयवर्णस्य द्वित्वमिति पूर्वसूत्रेण विहितम्। एवं सर्वथापि संयोगेषु वर्णद्वित्वमवश्यं कार्यम्। सार्वत्रिकोऽयं विधिरिति कृत्वा वाचयितारः स्वयमेव वाच्यिष्यन्तीति बुद्ध्या लिपिकारा द्विरुक्त्यर्हं वर्णं द्विर्न लिखन्तीति संप्रदायः। अतः 'सुध्यर्च्यः', 'मध्वरिः', 'क्षत्रियस्त्री' इति लिखितान्यपि पदानि 'सुद्ध्यच्चर्य्यः', 'मद्ध्वरिः', 'क्षत्त्रियस्स्त्री' इत्येव वाचनीयानि। शाकल्यादीनां मते द्वित्वस्यास्य प्रतिषधाः **'त्रिप्रभृतिषु शाकटायनस्य'** इत्यादिभिरुत्तरसूत्रैः पणिनिनैव दर्शिताः, तथापि तसंयोगद्वित्वाभाव आर्षेष्वेव प्रयोगेषूपलभ्यते। काव्येषु तु 'प्रह्रे वा' इति पिङ्गलसूत्रस्य उदाहरणभूताः

'झटिति प्रविश गेहं मा बहिस्तिष्ठ बाले'
'द्वितीयं हेमप्रकारं कुर्वद्भिरिव वानरैः'

इत्यदयो द्वित्रा एव प्रयोगा दृश्यन्ते।

### ११०। झलां जश् झशि। (८-४-५३)

झशि परे झलां जशादेशः स्यात्। 'झलां जशोऽन्ते' (६९) इति पदान्ते पूर्वमेव जश्त्वविधानात् अपदान्तार्थोऽयमारम्भः। यथा —

---

[19] वाक्ययोरपि संहितायां पूर्ववक्यान्त्यस्वरमादाय उत्तरवाक्याद्यसंयोगस्य द्वित्वं भवत्येव। 'शोण + ह्रदा'दौ रेफस्य हकारात् परस्य, 'वर्षति' अर्शसौ इत्यादौ रेफात् शषयोश्च द्वित्वं सर्वथापि न भवति च।

सुध् + ध्यर्च्य्यः = सुद्ध्यर्च्यः।        दुघ् + धं = दुग्धम्।

लभ् + धं = लब्धम्।        इध् + ध = इद्धम्।

### १११। अभ्यासे चर्च। (८-४-५४)

षष्ठाध्यायोक्ते अक्षरद्वित्वे द्विरुक्तपूर्वभागस्य ‘अभ्यासः’ इति संज्ञा। अभ्यासे स्थितानां झलां जशश्चरश्च स्युः। तत्रान्तरतम्यात् झशां जशः, खरां चर इति विवेकः। अतिखराणां खराः, घोषाणां मृदवश्च आदेशाः स्युः इति तात्पर्यम्। यथा —

| | | |
|---|---|---|
| भभूव = बभूव। | झघान = जघान। | थस्थौ = तस्थौ। |
| धधौ = दधौ। | छिच्छेद = चिच्छेद। | फफाल = पफाल। |

### ११२। खरि च। (८-४-५५)

खरि परे झलां चर आदेशाः स्युः। इदं पदान्ते अपदान्ते च भवति। अतो ‘झलां जशाऽन्ते’ (६९) इति विहितं जश्त्वं खरि परे न भवति। तत्र प्रकृतसूत्रेण चर्त्वमेव। यथा —

**पदान्ते —**

| | |
|---|---|
| सम्पद् + कामः = सम्पत्कामः | तद् + टीका = तड्टीका। (१०३) = तट्टीका। |
| विराड् + पुरिषः = विराट्पुरुषः | ककुभ् + कोणः = ककुप्कोणः। |
| तद् + चित्रम् = तज् + चित्रम्। (१०२) = तच्चित्रम्। | भिषग् + सङ्गः = भिषक्सङ्गः। |

**अपदान्ते —**

भेद् + तुं = भेत्तुम्        लभ् + स्यते = लप्स्यते।        धध् + ष्यति = धक्ष्यति।

### ११३। वावसने। (८-४-५६)

अवसाने झलां चरादेशो वा स्यात्। यथा —

वाक्, वाग्। त्रिष्टुप्, त्रिष्टुब्। सम्राट्, सम्राड्। द्विष् — द्विट्, द्विड्। चित्, चिद्। भिषक्, भिषग्।

### ११४। अणोऽप्रकृह्यस्यानुनासिकः। (८-३-५७)

अप्रगृह्यस्य अणः अवसाने अनुनासिकोवा। यथा —

| | |
|---|---|
| कर्म‿, कर्म। | बालिका‿, बालिका। |
| दधि‿, दधि। | कुमारी‿, कुमारी। |

मधु‿, मधु।

### ११५। अनुस्वारस्य ययि परसवर्णः। (८-४-५८)

अनुस्वारस्य ययि परे परस्य सवर्ण आदेशः स्यात्। यथा —

मुन्-चति = मुंचति = मुञ्चति। शन्-कते = शंकते = शङ्कते। शम्-युः = शंयुः = शँयुः।

### ११६। वा पदान्तस्य। (८-४-५९)

यथा — त्वं करोषि = त्वङ्करोषि, त्वं करोषि।

त्वं पचसि = त्वम्पचसि, त्वंपचसि।

सं वत्सरः = सव्वँत्सरः, संवत्सरः।

त्वं याचसे = त्वय्याँचसे, त्वं याचसे।

पुं लिङ्गः = पुंल्लि ँङ्गः, पुंल्लिङ्गः।[20]

### ११७। तोर्लि। (८-४-६०)

तवर्गस्य लकारे परे परसवर्णः स्यात्। आन्तरतम्याल्लकार एव परसवर्णः। यथा —

तद् + लक्ष्यं = तल्लक्ष्यम्। चित् + लयः = चिल्लयः। तस्मिन् + लय = तस्मिँल्लयः।

### ११८। उदः स्थास्तम्भोः पूर्वस्य। (८-४-६१)

उद् इत्युपसर्गात् परयोः स्थास्तम्भधात्वोः पूर्वसवर्ण आदेशः स्यात्। 'आदेः परस्य' (३३) इति परिभाषया 'स्था' 'स्तम्भ्' इत्यनयोरादिवर्णस्य सकारस्यादेशः। आन्तरतम्यपरीक्षायां सकारस्य थकार आदेशो युज्यते। यथा —

उद् + स्थानं = उत् + स्थानं = उत्+थ्थानं = उत्त्थानम्।

उद् + स्तम्भनं = उत् + स्तम्भनं = उत् + त्तम्भनं = उत्तम्भनम्।

### ११९। झयो होऽन्यतरस्याम्। (८-४-६२)

झयः परस्य हस्य पूर्वसवर्णो वा स्यात्। हकारस्यान्तरतमो घोषः। यथा —

सम्यग् + हितं = सम्यग्घितम्, सम्यग्हितम्। सम्राड् + हरति = सम्राड्ढरति, सम्राड् हरति।

तद् + हितं = तद्धितं, तद्हितम्। ककुभ् + हि = ककुब्भि, ककुब्हि।

### १२०। शश्छोऽटि। (८-४-६३)

झयः परस्य शस्य छो वा अटि परे। यथा —

प्राक् + शेते = प्राक्छेते, प्राक् शेते। कश्चित् + शेते = कश्चित्छेते, कश्चिच्छेते, (१०२) कश्चिच्शेते।

अप् + शब्दः = अप्छब्दः, अप्शब्दः। द्विट् + शस्त्रं = द्विट्छत्रं, द्विट्शस्त्रम्।

---

[20] ' रेफेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः' इति वार्तिकेन 'स्वर् नय' 'शोणह्रदः' 'कुण्ढं रथेन' इत्यादौ 'यरोऽनुनासिकेऽनुनासिको वा' 'अचो रहाभ्यां द्वे' 'वा पदान्तस्य' इति विधयो न प्रवर्तन्ते।

॥*॥ छत्वममीति वक्तव्यम्॥

अटीति न पर्याप्तं, शश्छोऽमीति सूत्रयितव्यम्। यथा —

तद् + श्लोकः = तच्छलोकः, तच्श्लोकः। तद् + श्मश्रू = तच्छमश्रू, तच्श्मश्रू।

अत्र प्रकरणपूर्त्यर्थं तुक्संधिरित्युक्तो भागो वक्तव्योऽस्ति, यमेव पाणिनिः 'संहितायाम्' (६-१-७२) इत्यधिकृत्य 'छे च' (ह्रस्वस्य तुक्) (६-१-७३), 'आङ्माङोश्च' (६-१-७४), 'दीर्घात्' (६-१-७५), 'पदान्ताद्वा' (६-१-७६) इति चतुर्भी सूत्रैः संहिताकार्येषु प्रथमत्वेन नीर्दिशति। अवाक्यादौ स्थितस्य छकारस्य द्वित्वं कार्यमिति प्रकरणस्यास्य फलितोऽर्थः। छकारस्य द्वित्वे कृते 'खरि च' (११२) इति पूर्वस्य चकारो भवति[21]।

यथा —

परि + छिन्नः = परिच्छिन्नः। आ + छादनं = आच्छादनम्।

तरु + छाया = तरुच्छाया। वि + छेदः = विच्छेदः।

**प्रत्यु०** — वाक्यादौ तु — 'छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः' — [मेघ]

एवं च वाकयादावेव केवलश्छकारो भवति। अन्यत्र सर्वत्रापि द्विरुक्त इति पर्यवसितम्॥

हल्संधिप्रकरणेऽत्र बहवो विधय उक्ताः। तेषां हृदयोपस्थितिकरणे लाघवाय तत्र मुख्याः सिंहावलोकितकेन कारिकाभिः संगृयन्ते —

**अन्ते झलि च चोः कुत्वं, हस्य ढ,-श्छशयोश्च षः।**
**झलां जशोऽन्ते झशि च, खर्येषां सर्वदा चरः, ॥ १ ॥**
**स्तोः श्चुना श्चुः, ष्टुना ष्टुश्च द्वयमप्यन्तमध्ययोः।**
**झयि पूर्वे तस्य घोषो, झयः शोऽमि च्छतां व्रजेत् ॥ २ ॥**
**तोर्लिलो, हलि मो बिन्दुः, पञ्चमे पञ्चमो यरः, ।**
**झल्यनन्त्ये नमोर्बिन्दु,-र्बिन्दोर्यय्यनुनासिकः, ॥ ३ ॥**

---

[21] अत्र पाणिनेः प्रक्रिया — ह्रस्वस्य छे परे तुगागमः। कित्त्वादयमन्त्यावयवः तथा च — परि + छिन्नः = परित् छिन्नः = परिच्छिन्नः (१०२)। दीर्घस्यापि तुकं विधाय पदान्तदीर्घस्य तुग्विकप्यते। वल्ली + छाया = वल्लीच्छाया इति। किंतु पदान्तदीर्घेऽपि तुङ्नित्य एवोप्युज्यत इति संप्रदायः। लाघवार्थमत्र फलितार्थ एव ग्रन्थे निर्दिष्टः।

**विसर्गोरस्यावसाने, झलां चर्त्त्वं च वा तथा।**

**पदान्ते सस्य रुत्वं स्यादिसादावशि तच्छ्रुतिः॥ ४ ॥**

[ इस्, ईस्, उस्, ऊस्, इत्यादिवदिकारादिस्वरपूर्वकस्य सकारस्य अशि पर एव रुरेफस्य श्रवणं भवति। हविस् + अत्र = हविरत्र। धनुस् + अत्र = धनुरत्र। ]

**असि रोरति हश्युत्वम्,**

[अस् इति ह्रस्वाकारपूर्वस्य सस्य रुत्वे कृते तस्य अति हशि च परे उत्वम्। यशस् + अत्र = यशोऽत्र। यशस् + हरः = यशोहरः।]

**असासोरति चेचि यः।**

[अस्, आस् इत्यवर्णपूर्वस्य सस्य यो रुस्तस्य आकारे, इकारादिस्वरे वा परे यकार आदेशः। देवास् + अत्र = देव अत्र। देवास् + आयान्ति। देवस् + इह =देवा इह। ]

**लघुप्रयत्नो वा योऽयम्,**

[अस्य यकारस्य लघुप्रयत्नो लोपो व वा भवति। ]

**आसि लोपोऽति हश्यपि॥ ५ ॥**

[देवास् + अत्र = देवा अत्र। अत्र लघुप्रयत्नतोऽपि स्यादेव। देवास् + हरन्ति = देवा हरन्ति। ]

**रोरि लोपे पूर्वदीर्घो, रो विसर्गः कपोः खफोः।**

**तत्र ≍ क ≍ पौ च वा स्यातां, शर्विसर्गौ तथा शरि ॥ ६ ॥**

**विसर्गस्य सकारः स्यात् कुपुभिन्ने परे खरि।**

**श्चुष्टु चास्य श्चुष्टुयोगे, तस्मात् स्तावेव सश्रुतिः॥ ७ ॥**

**अवाक्यादिस्थसंयोगे द्विर्वाच्यो वर्ण आदिमः।**

**रहादौ तु परद्वित्वं द्विर्वाच्यश्छोऽप्यनादिमः ॥ ८ ॥**

इति हल्संधिप्रकरणम्।

———————————————————

# अथ शब्दविभागः ॥

वर्णैरक्षराण्यारभ्यन्ते ; अक्षरैः प्रकृतयः ; प्रकृतिभिः पदानि ; पदैर्वाक्यानि ; वाक्यैर्भाषा इति हि क्रमः। तत्र वर्णाः व्याख्याताः विभक्ताश्च। अक्षराणां विभागश्छन्दःशास्त्रविषयेऽपि व्याकरणेऽपि क्वचिदुपयुज्यत

ऽ—॥

ँ